The facts mentioned in the inscriptions agree with the prince on whose advice Amṛtānanda wrote the work. The Prince is addressed as the Ruler of Veṅgi; and his grand mother was the daughter of the king of Veṅgi. He is called सोमसूर्यकुलोत्तंस (I. 4); his father belonged to Solar Dynasty and his grandmother belonged to the Lunar Dynasty. At the end of the Third Chapter, there is a word in the last Pāda, which is not quite clear; the Pāda is: मानिन्निरुवत्तुगण्ड-मन्ननृप । Annadeva, the son of Bhaktirāja, mentioned in the Inscription, married Irugāmba, daughter of the King of Pinnuṇḍi. The passage is:

[1] Ep. Indica. Vol. XXVI. No. 2. P. 28.

श्रीचक्रवर्तितनयामिरुगाम्बिकां यः सूर्यान्ववायसुकृतैकफलं सुशीलाम् ।
पुंर्निडिभूपतनयां ललनाललामभाग्योन्नतामुदवहद्गिरिजामिवेशः[1] ॥

I have a feeling that the passage has some connection with the name of his consort, though I am not able at present to correct the reading to fit into it.

We may definitely say that the prince who advised Amṛtānanda to write the book is the son of this Bhaktirāja[2]; I am not sure if it is the Annadeva who succeeded him or any other brother of his. The only other brother of whom there is inscriptional evidence does not bear the name of Manma (Manna or Manva[3]). If we accept this Bhaktirāja as the king who was ruling the country when the work was written, we must say that the work was written before the death of Bhaktirāja, in 1366 A.D. We may assign the work to the beginning of the second half of the fourteenth century.

Adyar Library C. KUNHAN RAJA
25-9-49

---

[1] *Ibid.*, (L. 28) and Fourth Plate, First Side (L. 29).
[2] One difficulty is that Āmṛtānanda speaks of his Title as स्वागमहासमुद्र, which is not found in the Inscription. But this is not very serious.
[3] *Ibid.*, Vol. xxvi, No 2, P. 27, LL. 26-28.

उपोद्धातः

काव्येषु वाच्यातिरेकेण प्रतीयमानस्य सरसस्य निगूढस्यैवार्थस्य रसिकजनहृदयावर्जकता, नागूढस्य सुस्पष्टविवृतस्येति नेदमनुभवविसंवादि सहृदयानाम् । नियतिरियं न केवलं काव्येषु, परं सरसरसिकसंलापगोष्ठीष्वपि; यन्मूलोऽयं तत्र विदग्धाविदग्धप्रविभागो रसिकानाम् । 'कस्माद्देशादागतो भवान्' इति विवक्षित एवार्थः 'कतमो वा भवद्विरहपर्युत्सुकजनो देशः' इति वचनभङ्ग्या विक्रियमाणः कमपि चमत्कारमुपजनयति सहृदयानां चेतसि । अत एवालंकारिकचूडामणिः सर्वज्ञभामहो वक्रोक्तिमेव वाचामलंकरणहेतुमभिमन्यते । यदाह—

"वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृतिः ।"
"सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना[1] ॥"

इति । तदनुसारिणश्चान्ये वक्रोक्तिसौभाग्यपरीवाहभूतानेव व्याजस्तुतिनिन्दादीनलंकारानाद्रियन्ते । तदेवं निगूढस्यार्थस्य रस्यतातिशयाधायिनो रसा अलंकाराश्चेति सर्वसंप्रतिपन्नम् । सोऽयं काव्यरसास्वादो रसालंकारादिलक्षणपरिज्ञानमन्तरा न भवितुमर्हति । यद्यपि तल्लक्षणावबोधविधुरा अपि परिमितसंपादितपदपदार्थज्ञानाः किंचिदिव सत्काव्यपठनादिना प्रमोदमनुभवन्ति, तथापि तल्लक्षणविवेचनपरिष्कृतचेतस एव विगलितवेद्यान्तरं निरति-

[1] Bhāmahālaṁkāra, 1—36; 2—85.

शयमानन्दमनुभवितुं प्रभवन्तीति सर्वसाक्षिकमेतत् । यद्यपि पामरा जनाः पश्वादयश्च हृद्यकण्ठैर्गायकैर्गीयमानं संगीतमुपश्रुत्य किंचिदिव चेतसि प्रमोदमाबिभ्रति, तथापि तत्तद्रागतालादिलक्षणपरिज्ञानिन एव तस्य सौभाग्यं मधुरिमाणं च यथावदवगन्तुं तेनानन्यसाधारणं प्रमोदातिशयमनुभवितुं च प्रभवन्ति । अतो रसालंकारमेदुरतया भावुकानां चेतसि ब्रह्मानन्दसध्रीचीं कामपि चमत्कृतिमादधानानां काव्यरत्नानां लक्षणादिनिरूपणे रसालंकारादिविवेचने च बहुधा प्रयतितं मेधाविभिः ।

तच्चेदं शास्त्रं साहित्यशास्त्रमलंकारशास्त्रमिति च प्रथामुपगतं बहुप्रपञ्चं ववृधे । सहितानां भावो हि साहित्यमित्युच्यते । पदवाक्यप्रमाणादिरूपेण काणादपातञ्जलादिरूपेण गीतनाट्यादिरूपेण च बहुधा विभिन्नानां विद्यानां समाहारेण प्रवृत्तत्वादिदं साहित्यशास्त्रं भवति । कामं भवन्तु विद्वांसः प्रत्येकमेकैकस्मिन् शास्त्रे सुबहु कृतपरिश्रमाः स्वस्वमतस्थापने प्रवीणतमाश्च, परं तु न ते सर्वेऽपि कवीभवितुं प्रभवन्ति । कविना हि सर्वतन्त्रयाथार्थ्यवेदिना तत्तच्छास्त्रसारासारविवेचनशीलेन तत्तत्सिद्धान्तं मधुरया सरसया च वाचोपवर्णयितुं प्रवीणेन च भाव्यम् । [1] यदाह यायावरीयः—"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति चतस्रो विद्याः । पञ्चमी साहित्यविद्या । सा हि चतसृणामपि विद्यानां निष्यन्दः" इति । तथा चाह—

"[2]पदवाक्यप्रमाणेषु तदेतत्प्रतिबिम्बितम् ।
यो योजयति साहित्ये तस्य वाणी प्रसीदति ।"

इति । ये तु सतृणाभ्यवहारिणः "[3]शब्दार्थौ सहितौ काव्यम्" इति पूर्वेषां

[1] Kāvyamīmāṁsā P. 4. G. O. S. No. I Baroda, 1934.

[2] Abhidhāvṛttimātṛkā, Stanza 14. Nirnayasagar Press Bombay, 1916.

[3] Bhāmahālaṁkāra, 1-16.

वचने दृढमुष्टिकामवलम्बमानाः "शब्दार्थयोः सहितयोर्भावः साहित्यम्" इति निर्ब्रुवन्ति, तैः काव्यशास्त्रमिति ऋजुना पथा निर्देष्टव्ये साहित्यशास्त्रमित्यन्यथा निर्देशे समञ्जसो हेतुर्वक्तव्यः। अस्मदुक्तरीत्या निर्वचने तु सर्वविद्यानां ज्ञानं कवीनामावश्यकमित्यर्थावेदनाय तथा निर्देश इति सामञ्जस्यमस्ति। अलंकारशास्त्रमिति व्यवहारे अलंकुर्वन्तीत्यलंकारा इति काव्यशोभाकरा उपमादयोऽलंकारा माधुर्यादयो गुणाः शृङ्गारादयो रसाश्चालंकारशब्देन संग्राह्याः। तदेवं चमत्कृतिविशेषजनकत्वमलंकारत्वमिति सुभगया रीत्या निर्वचनं भाव्यम्। प्रायिकीं लोकप्रसिद्धिमनुसृत्यानुप्रासादिषु शब्दालंकारेषु तथोपमादिष्वर्थालंकारेषु च यद्यलंकारशब्दः प्रयोक्तुमिष्यते, तदापि चमत्कृतिविशेषेति विशेषशब्दबलादितरव्यावृत्तिः करणीया। गुणैः रसैश्च जन्यायाश्चमत्कृतेर्विलक्षणा हि अनुप्रासोपमादिजन्या चमत्कृतिः। अत्राव्याप्त्यतिव्याप्त्याद्युद्भावने पण्डितवरैर्नातीवाग्रहः कार्यः। ये त्वत्र स्वेषां पाण्डित्यं तर्कातर्किनैपुणं चाविष्कर्तुमवच्छेदकावच्छिन्नादिपदघटनेन निर्वचनं कर्तुं प्रयतन्ते, तानित्थमुपहसन्ति सरसभारतीस्पृहयालवः सहृदयाः—

"कठोरतार्किकालापैर्यदि काव्यपरिष्कृतिः।
वासीकुठारकुद्दालैर्नासाभरणरञ्जनम्॥"

इति।

तदेवं काव्यलक्षणादिकथने बहुषु व्यापृतवत्स्वपि, भरतमुनेरनन्तरमासतमतया परिगणिता भामहदण्डिप्रभृतयोऽपि न न्यक्षेण विषयमिमं प्रत्यपादयन्। भामहः काव्यालंकारे श्रव्यकाव्यानुबन्धिनो गुणदोषानलंकारांश्च निरूपयन्नपि दृश्यकाव्यनिरूपणे रसविवेचने च सुतरामुदासिष्ट। एवमाचार्यदण्ड्यादयोऽपि। धनंजयादयस्तु दृश्यकाव्यनिरूपणव्यासक्ताः श्रव्यकाव्यनिरूपणे वाचंयमतामवालम्बन्त। एवमेकत्र सर्वेषां साहितीविद्यासंबद्धविषयाणां समुच्चित्य निरूपणं दुर्लभमाकलय्य कविवरोऽयममृतानन्दयोगी

रमणीयमिममलंकारसंग्रहं नाम ग्रन्थमारचयत्। ग्रन्थोऽयं सर्वालंकारसंग्रह इत्याख्ययापि कतिपयेषु कोशेषु प्रख्याप्यते। भामहदण्ड्यादीनां प्राचामालंकारिकाणां ग्रन्थेभ्यस्तानि तानि वचनान्युद्धृत्य मनागिवावापोद्वापाभ्यामत्र निवेश्य संकलितानीति विभाव्यमस्यान्वर्थं नाम।

अत्र च ग्रन्थारम्भे समुद्दिष्टेन निरूपणीयविषयपरिगणनेन ग्रन्थोऽयमेकादशभिः परिच्छेदैः प्रविभक्त इत्यवगम्यते। मातृकाकोशेष्वपि तथैकादश परिच्छेदाः प्रविभज्य निर्दिष्टा उपलभ्यन्ते। एवं स्थिते वस्तुतत्त्वे १८८७ तमे क्रिस्तुसंवत्सरे कालीघट्ट (Calcutta) नगरे मुद्रापितमपूर्णमस्य पुस्तकमेकं प्रमाणीकृत्य पञ्चभिः परिच्छेदैः परिमितोऽयं ग्रन्थ इति केषांचिदाधुनिकविमर्शकानां वचनं न विस्रम्भार्हं प्रतीमः[1]। एवमादितः पञ्च परिच्छेदा एवामृतानन्देनारचिताः, उपरितनो भागस्त्वन्येन केनापि स्वयं विरचय्य संयोजितः स्यादिति तदनुसार्युल्लेखोऽपि न विचारसहः—यतः पूर्वोत्तरभागयोरुभयोरपि ग्रन्थरचनाशैल्यभिन्नरूपा लक्ष्यते, आप्ततमैश्चान्यैः ग्रन्थकारैरुपरितनभागस्थानि वचनानि बहून्यमृतानन्दीयतयोपादीयमाना दृश्यन्ते। अत एकादशभिः परिच्छेदैः परिच्छिन्नोऽयं ग्रन्थ इति निर्णीयते।

अथैकादशसु परिच्छेदेषु प्रतिपाद्यमाना विषयाः—

प्रथमः परिच्छेदः—काव्यानामारम्भे प्रथममुपयोगार्हाणां शुभंयूनां तदितरेषां च वर्णानां गणानां च विवेचनमत्र क्रियते। क्षेमंकरेण वर्णेन गणेन च समारब्धे काव्ये, तत्प्रणेतुः कवेस्तद्वर्णनीयस्य नायकस्य तत्पठितॄणां च भद्राणि भवन्ति, अन्यथा त्वभद्राणीत्यशुभानां वर्णगणानां सर्वथा त्याज्यत्वमवसीयते। "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च" इति हि भगवान् पतञ्जलिरुपदिशति[2]।

[1] History of Sanskrit Poetics by S. K. De. 1923 Vol. I Page 285.
[2] Mahābhaṣya 1-1-1.

इत्थमात्मनोपवर्णितं नियमं स्वस्याचारेणापि सत्यापयन् ग्रन्थकारो ग्रन्थमिमं "[1]जगद्वैचित्र्यजननीम्" इति जकारेण यगणेन च प्रारेभे । "मित्रलाभो जः[2]" इति "यो वारिरूपो धनकृत्[3]" इति च तयोः फलमभिहितं स्वेनैव । भगवानादिकविर्वाल्मीकिश्चादिकाव्यमारभमाणः "[4]तपःस्वाध्याय-निरतम्" इति तकारं यगणं च प्रयुयोज । "सुखं तात्तु[5]" इति च तकारोपयोगं सुखप्रदमाचष्टे ग्रन्थकारः । नियमश्चायं न केवलं पद्यकाव्येषु, अपितु गद्यकाव्येष्वपि । तथा न केवलं संस्कृतकाव्येषु, अपितु प्राकृत-काव्येष्वपीति वेदितव्यम् ।

द्वितीयः परिच्छेदः—काव्यस्य कवयितारः कवयः सप्तविधाः—रौचिकवाचिकादिभेदात् । वामनेन काव्यालंकारसूत्रे अरोचकिनः सतृणा-भ्यवहारिणश्चेति कवयो द्वेधा विभिद्यन्ते । तत्र प्रथमे विवेकिनः शास्त्रेण शासनीया भवन्तीति तान् सप्तधा प्रविभजत्यमृतानन्दः । तत्र षष्ठो विवेकी

"शब्दार्थगुणदोषज्ञो महाकविमतानुगः ।
शास्त्रालंकारसंस्कारी विवेकी कविपुंगवः[6] ॥"

इति सप्तविधेषु कविषूत्तमो निर्दिष्टः । अत्र शास्त्रसंस्कारेणालंकारवासनया च यो युज्यते स एव कविपुंगवो भवितुमर्हति, नान्य इति वदन्

"अधनस्येव दातृत्वं क्लीबस्येवास्त्रकौशलम् ।
अज्ञस्येव प्रगल्भत्वमकवेः शास्त्रवेदनम्[7] ॥"

इति भामहोक्तिमनुस्मारयति । अथ कवितानिदानानि शक्तिनैपुणादीन्यनुदर्शयन्

"शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे[8] ॥"

[1] Alaṁkārasaṁgraha P. 1.
[2] Alaṁkārasaṁgraha P. 4.
[3] ,, P. 4.
[4] Rāmāyaṇa 1-1-1.
[5] ,, P. 4.
[6] Alaṁkārasaṁgraha P. 6.
[7] Bhāmahālaṁkāra 1-3.
[8] Kāvyaprakāśa 1-3.

इति प्रकाशकृद्वचनमनुसंधत्ते। अत्र च "नैसर्गिकी च प्रतिभा[1]" इत्याचार्यदण्डिवचनं "सा देवताप्रसादाच्च[2]" इति शक्तिविषयेऽतिदिशति। अथ च वाक्यार्थस्वरूपविवेचने प्रवृत्तः "संयोगो विप्रयोगश्च[3]" इत्यादिकं भर्तृहरिवचनमवलम्बमान आलंकारिकसमयमाविष्करोति।

तृतीयः परिच्छेदः—अत्र रसा निरूप्यन्ते। रसविषये सन्त्यालंकारिकाणां मतभेदाः। यथा—"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः[4]" इति भरताचार्यवचने निष्पत्तिशब्देनोत्पत्तिर्विवक्षितेति केचित्। ज्ञप्तिरित्यन्ये। भुक्तिरिति परे। व्यक्तिरितीतरे। तत्र विभावैरुत्पादितो रसोऽनुभावैर्ज्ञापितो व्यभिचारिभिः परिपोषितश्च भवतीत्युत्पत्तिवादिनां भट्टलोल्लटादीनां मतम्। विभावादिभिः सर्वैर्मिलितैः रसो ज्ञाप्यते, न तूत्पाद्यते, यथा धूमेन धूमध्वज इति ज्ञप्तिवादिनां महिमादीनां मतम्। विभावादिभिः सहकारिभिः रसो भुज्यते; रसभोगश्चायं लौकिकभोगविलक्षणः स्वप्रकाशानन्दमयसंविद्विश्रान्तिभूमिरिति भोगवादिनां भट्टनायकादीनां मतम्। लोके नायिकानायकयोर्दर्शनस्पर्शनादिनानुमितो यस्तद्रतिरूपः स्थायिभावः सामाजिकानां हृदि विपरिवर्तते, स एव पश्चात्काव्यनाट्यप्रकाशितैर्विभावाद्यैर्व्यज्यमानः सन् रसो भवतीति व्यक्तिवादिनामानन्दवर्धनाभिनवगुप्तादीनां मतम्। अस्यालम्बनविभावलाभमनुसृत्यैव लोल्लटादिभिरुत्पत्त्यादय उत्प्रेक्षिता इति ज्ञेयम्। रसश्चायं नाभिधाया गोचरः, संकेताभावात्। नापि लक्षणायाः, मुख्यार्थबाधाभावात्। नापि तात्पर्यस्य, तदभिधायकपदान्तरसाचिव्याद्यभावात्। तस्मादभिधालक्षणातात्पर्यातिरिक्तव्यञ्जनाव्यापारगम्यः। व्यञ्जकश्च विभावादिः। ब्रह्मानन्दसब्रह्मचारी रसः। अयं चासंलक्ष्यक्रमव्यङ्ग्यः। विभावादिव्यञ्जकक्रमसत्त्वेऽपि रसास्वादातिशयमहिम्ना शतपत्रपत्रवेधनवदसंलक्ष्यक्रमत्व-

[1] Kāvyādarśa 1-103.
[2] Alamkārasamgraha P. 7.
[3] Vākyapadīya 2-317.
[4] Nāṭyaśāstra 6-32.

मिति सिद्धान्तः। अत्र चामृतानन्दोऽभिव्यक्तिपक्षमेवाहत्य रसविवेचने प्रवर्तते। यदाह—"ज्ञायमानैर्विभावाद्यैर्व्यक्तः स्थायी रसः स्मृतः" इति[1]। शृङ्गारहास्यादयः शान्तेन नवमेनाप्यनवमेन सह नव रसाः, तेषां प्रत्येकं यथार्हं विभावानुभावसात्त्विकव्यभिचारिभावाश्चात्र प्रतिपादिताः। नवानामपि रसानां प्रत्येकं वर्णविशेषं देवताभेदं च विनिर्दिशन् कविरसौ तत्तद्रसानां स्वरूपगुणादीन् सहृदयानां चेतसि द्रढयति। शान्तरसप्रस्तावे कविरयम्,

"अत्रालम्बनविभावः स्याच्छम्भोस्तच्छाश्वतं पदम्।
उद्दीपकास्तु वेदान्तवेदिसंभाषणादयः[2] ॥"

इति निर्दिशन्नात्मनो वेदान्तितां तत्रापि शिवभागवततां चोपष्टम्भयति। "शान्तः स्फटिकवर्णोऽस्य परं ब्रह्माधिदेवता[3]" इति वदन् शान्तरसप्रधाने काव्ये नाट्ये च परब्रह्ममननशीलाः परमभागवता एव रसास्वादे प्रभविष्णवो नान्ये इति तादृशानां सभ्यानां विरलतां चाभिमन्यते। एवं रसानां मिथो वैरप्रस्तावे "शान्तः सर्वोत्तरस्तस्य न मैत्री न विरोधिता[4]" इति शान्तस्य सर्वोत्कृष्टत्वं "सममतिरात्मसुहृद्विपक्षपक्षे[5]" इत्युक्तां समचित्ततां चाभिव्यञ्जयन् शान्तरसनास्तित्ववादात् कर्णौ पिधाय सुदूरमपक्रान्तः स्वस्य योगिप्रवराभिख्यां सत्यापयति। एवं हास्यरसस्योदाहरणतया

"संमार्जनीसततसंगमनादपूतं
पाणिं पवित्रितकचे बहुतीर्थतोयैः।
मन्मस्तकेऽर्पितवती मधुपानमत्ता
वित्तस्य दानमिह किंनु विमाननाय[6] ॥"

[1] Alaṁkārasaṁgraha P. 10.
[2] and [3] ,, P. 21.
[4] Alaṁkārasaṁgraha P. 22.
[5] Viṣṇupurāṇa 3-7-20.
[6] Alaṁkārasaṁgraha, P. 16.

इति पद्यं निदर्शयन् सर्वस्वदानेऽप्यतृप्तया गणिकयात्मनः संभूतं पराभवं सनिर्वेदमनुशोचतः कस्यचित् धूर्तविटस्य वचनवर्णनमुखेन लोकस्य वैषयिकसुखाद्विरक्तिमुपदिशतीवायं कविः। भामहादिभिः प्राचीनैरालंकारिकैरङ्गीकृतान् रसवदाद्यलंकारान् निराकृतवन्तं कुन्तलकमनादृत्य तानलंकारानङ्गीकृत्य सोदाहरणं प्रपञ्चयत्ययं ग्रन्थकारः।

चतुर्थः परिच्छेदः—धीरोदात्तललितादिभेदभिन्नानां चतुर्णां नायकानां प्रत्येकं दक्षिणशठादिभेदेन पुनरवान्तरभेदमुपवर्ण्याहत्याष्टचत्वारिंशत् भेदा उक्ताः। तथा स्वीयान्यादिभेदेन त्रिविधानां नायिकानां पुनर्मुग्धामध्यादिभेदेन विविधा भेदाः प्रतिपादिताः। एवं शोभाविलासादीनष्टौ नायकालंकारान् भावहावादीन् विंशतिं नायिकालंकारांश्चोपपादयति।

पञ्चमः परिच्छेदः—"रीतिरात्मात्र काव्यस्य[1]" इति वैदर्भ्यादीन् रीतिभेदान् काव्यस्यात्मतया निर्दिशन् वर्णपदसंघटनारूपा रचनैव काव्यस्य ग्राह्यतायां प्रधानतमो हेतुरित्यभिप्रैति। अत्र वैदर्भीरीतिनिरूपणावसरे 'वैदर्भीरीतिसंदर्भे कालिदासः प्रगल्भते' इत्याभाणकमनुसरन् कालिदासीयमेव

"वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम्।
छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम्[2] ॥"

इति पद्यरत्नमुदाहरति ग्रन्थकारः। सहृदयहृदयावर्जकेन रचनाविशेषेण लब्धसत्ताकस्य काव्यस्य परिकर्मसाधनान्युपमादयोऽलंकाराः सुन्दरस्य देहस्येव केयूरादयः। अथ श्लेषप्रसादादयो गुणाः शोभावहा निरूपिताः। स्वभावोक्तिप्रमुखाः पञ्चविंशतिरर्थालंकाराः सलक्षणोदाहरणमुपवर्णिताः। गुणालंकारयोश्चारुताहेतुत्वे समानेऽपि तयोराश्रयभेदात् पृथक्परिगणनम्। संघटनाश्रया गुणाः, अर्थाश्रयास्त्वलंकारा इति परस्परं भेदः। अलंकाराश्चैते

[1] Alamkārasamgraha P. 42. [2] Raghuvamsa 13—2.

चतसृभिः कक्ष्याभिः प्रविभज्यन्ते । तथाहि — केचित्प्रतीयमानवस्तुकाः ; यथा —समासोक्तिव्याजस्तुत्यादयः । केचित्प्रतीयमानौपम्याः ; यथा—उत्प्रेक्षा-दीपकादयः । केचित्प्रतीयमानरसभावाः ; यथा—रसवत्प्रेयऊर्जस्विदादयः । एवं साधर्म्यमूलेष्वलंकारेष्वपि साधर्म्यस्य भेदप्राधान्यात् अभेदप्राधान्यात् भेदाभेदप्राधान्याच्च त्रैविध्यं भाव्यम् । निदर्शनदीपकादयो भेदप्रधानसाध-र्म्यमूलाः । रूपकपरिणामादयोऽभेदप्रधानसाधर्म्यमूलाः । अनन्वयस्मरणा-दयो भेदाभेदप्रधानसाधर्म्यमूला अवगन्तव्याः । अत्र चालंकारोद्देशे कविरय-माचार्यदण्डिनमेवानुसरति । तथा दीपकावृत्त्योर्निर्देशे विवक्षिते "दीपका-वृती[1]" इति दण्डिवचनमेवानुवदति । अत्र आवृतिरावृत्तिरिति पर्यायशब्दौ । आङ्पूर्वकात् वृतुधातोः स्त्रियां क्तिनि आवृत्तिरिति रूपम् । तत एव "इक्श्तिपौ धातुनिर्देशे[2]" इति इकि आवृतिरिति रूपम् । वाच्यवाचकयोर-भेदविवक्षया निर्देशः । "इक् कृष्यादिभ्यः[3]" इति वा इक् । "इगुपधात् कित्[3]" इतीन्प्रत्ययस्तु कर्तर्येवेति न प्रकृते स्वरसोपयोगी । अन्ततः प्रत्यक्षानुमानोपमानागमार्थापत्त्यभावसंभवैतिह्यानीत्यष्टौ प्रमाणान्यलंकारकोटौ परिगणय्य सलक्षणोदाहरणं प्रतिपादितानि ।

षष्ठः परिच्छेदः—परिच्छेदेऽत्र काव्येषु सर्वथा त्याज्यतयाभिमता दोषाः प्रतिपादिताः । यदाहुः—

"तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्[4] ॥"

इति,

दोषः सर्वात्मना त्याज्यो रसहानिकरो हि सः ।
अन्यो गुणोऽस्तु वा मा वा महान्निर्दोषता गुणः[5] ॥"

[1] Kāvyādars'a 2—4. [2] cf. Pāṇini 3-3-108. [3] Uṇādi 569.
[4] Kāvyādars'a 1—7. [5] Alaṁkāras'ekhara 4—1.

इति च। दोषाश्च पदगता वाक्यगता अर्थगताश्चेति त्रिधा भिद्यन्ते। श्रुतिकटुसमर्थादयः पददोषाः। प्रतिकूलवर्णादयो वाक्यदोषाः। अपुष्टकष्टादयोऽर्थदोषाः। दोषेष्वेतेषु केषांचित् कदाचित गुणत्वमपि संभवतीति निरूपितम्। अन्ते च कविसमयसिद्धाः केचन विशेषाः प्रतिपादिताः।

सप्तमः परिच्छेदः—अत्र नाट्योपयोगिनः पञ्च संधयः, तदङ्गानि च सविस्तरमुपवर्णितानि। रूपकेषु स्तोकोपक्रान्तस्येतिवृत्तस्य वैरस्यलेशमन्तरा कथंकारं परिपोषः कर्तव्यः? तत्राप्याधिकारिकस्य तस्य प्रासङ्गिकेनेतिवृत्तेन कथंकारमुपयोगो वर्णनीय इत्यादिपरिज्ञानं संधितदङ्गवर्णनस्य प्रयोजनम्। अस्मिन् विषये दशरूपकोक्तां प्रक्रियां क्वचित्क्वचित् तत्रत्यवचनोद्धारेणानुसरत्ययं ग्रन्थकारः।

अष्टमः परिच्छेदः—अस्मिन्परिच्छेदे भारत्यादयो वृत्तयः प्रतिपादिताः। अन्ते च पात्रभेदेन भाषानियमः, परस्परसमाह्वानप्रकारश्च निर्दिष्टः।

नवमः परिच्छेदः—नाटकप्रकरणादीनां दशानां रूपकाणां स्वरूपं रसादिनियम इत्यादयः सप्रपञ्चमुपवर्णिताः। तथा नाटिकादीनामुपरूपकाणां लक्षणान्युदाहरणानि च सविस्तरमुपपादितानि।

दशमः परिच्छेदः—सिद्धिप्राप्त्यादयो नाट्यालंकारास्त्रिंशत सम्यगुपपादिताः।

एकादशः परिच्छेदः—मुक्तकादीनां लक्षणम्, उदाहरणभोगावल्यादिचाटुप्रबन्धानां स्वरूपं च सविस्तरमुपपादितम्। चाटुप्रबन्धभेदाश्चैवमन्यत्र ग्रन्थान्तरे परिगणिताः—

"[1]चाटुप्रबन्धा विख्याता उदाहरणमादिमम्।
चक्रवालं चतुर्भद्रं चतुरुत्तरमप्यथ॥

[1] Alaṁkāramuktāvali by Kṛṣṇayajvan. Adyar Library MS. No. 29. K. 18.

आवली भोगबिरुदगुणानामथ घोषणाः ।
विजयत्यागरङ्गाणामित्याद्याः कविकल्पिताः ॥ " इति ।

स चायममृतानन्दयोगी भक्तिभूपतिसूनोस्त्यागमहासमुद्रादिबिरुदाङ्कितस्य मन्मभूपतेर्नियोगादिममलंकारसंग्रहमग्रथ्नादिति ग्रन्थादिमैः पद्यैरवगम्यते । तमिमं मन्मभूपतिमधिकृत्य प्रशस्तिश्लोकान् कांश्चिदारचय्य तानेव कतिपयलक्षणानामुदाहरणतया ग्रन्थमध्ये संयोजयति ग्रन्थकारः । प्रतिपरिच्छेदमन्तिमं श्लोकमेकं तत्प्रशंसापरमायोजयति । तैश्च श्लोकैर्भूपतिरयं गण्डरगण्डः, तोण्डनिर्यङ्कः, कोमराङ्कभीमः, नूत्नसाहसाङ्कः, इत्यादिभिर्बिरुदैर्विभूषितोऽभूदित्यवगम्यते । मन्मभूपालोऽयं मन्ननाम्नाप्यभिहितस्तैलिङ्गचोडराजसु प्रसिद्धो मन्म-गण्डगोपालदेव एव भवितुमर्हतीति विमर्शका अभिप्रयन्ति[1] । जम्बुकेश्वरक्षेत्रदेवालयस्थेन प्रतापरुद्रदेवस्य शिलाशासनेन मन्म-गण्डगोपालदेवोऽयं प्रतापरुद्रस्य प्रसादपात्रं बभूवेति ज्ञायते[2] । किंच १२१९ तमे शकसंवत्सरे (1297 A.D.) लिखितेनान्ध्रदेशस्थनरसराबूपेट्टशासनेन मन्म-गण्डगोपालदेवः नल्लसिद्धेर्ज्येष्ठसूनुः प्रतापरुद्रदेवस्य परतन्त्रो भूत्वा काञ्चीं स्वायत्तीकृत्याशिषदिति विज्ञायते[3] । अनेन च शासनेन मन्म-गण्डगोपालस्य समयः A.D. 1297 तमवत्सरात् पूर्व इति ज्ञायते । प्रतापरुद्रदेवस्य समयः A.D. 1216 आरभ्य 1299 पर्यन्त इति विमर्शकाः[4] ।

[1] The Introduction to the Rasaratnākara, Madras University Publications, Kanarese Series No. 2 Madras, 1932. Page 13.

[2] The Introduction to the Pratāparudriya, Bombay Sanskrit and Prakrit Series No. 55. Bombay, 1900. Page 17. *Vide* the verse—

" तत्राग्रजः सुतो मन्मो-गण्डगोपालभूपतिः ।
प्रतापरुद्रभूपस्य प्रसादार्जितवैभवः ॥ "

[3] Epigraphica Indica Vol. VII, PP. 128—32.

[4] The Introduction to the Rasaratnākara, referred to above, Page 16.

श्रीवेंकटनाथदेशिकैः (1268 to 1369 A.D.) स्वकीये संकल्पसूर्योदये प्रस्तावनायाम्,

" [1]न तच्छास्त्रं न सा विद्या न तच्छिल्पं न ताः कलाः ।
नासौ योगो न तज्ज्ञानं नाटके यन्न दृश्यते ॥ "

इति पद्यममृतानन्दीयालंकारसंग्रहादुद्धृत्य निवेशितमिति तद्व्याख्यातारः[2] । अतोऽलंकारसंग्रहस्य रचनाकालः श्रीवेंकटनाथदेशिककालात् पूर्वतनः प्रायशः 1230 A.D. तमो भवेदित्यभ्यूह्यते । किंच संकल्पसूर्योदये " [3]तुण्डीरं मण्डलं मे कुलपतिरपि च स्कन्दभूपालवन्द्यः " इति श्लोके स्कन्दभूपालपदेन गण्ड-गोपाल एव चित्रोक्त्या विवक्षित इति सांप्रदायिका अभिप्रयन्ति । एतेन श्रीवेंकटनाथस्य काले काञ्च्यां गण्ड-गोपालनाम्नो भूयसी प्रथा समवर्ततेति ज्ञायते । अत एवमादिभिरुपपत्तिभिरमृतानन्दयतिर्गण्ड-गोपालदेवस्य सभायां प्रायः A.D. 1230 तमे वत्सरेऽभूत्, तदैव चालंकारसंग्रहमरचयदिति वक्तुं शक्यते ।

अत्रेदमवधेयम्—अमृतानन्दस्यालंकारसंग्रहकरणे निदेष्टा भक्तिभूपतेः सूनुः मन्मभूपाल इति निर्दिश्यते । अस्मिंश्च ग्रन्थे तस्य भूपालस्य नामोपविंशेषु प्रदेशेषु मन्म इत्येव निर्दिश्यते, न कुत्रापि गण्ड-गोपालदेव इति । यद्ययं तत्त्वतो गण्ड-गोपालदेवोऽभविष्यत् तन्नूनं यत्र कुत्रापि प्रदेशे तेन नाम्ना स निर्दिष्टोऽभविष्यत् । अतो ज्ञायते केवलं मन्मेति नाम्ना प्रसिद्धः कश्चिन्नृपतिरमृतानन्दस्य ग्रन्थकरणे प्रेरक इति । आसीच्च केवलमन्मनाम्ना प्रथितो नृपतिर्गण्ड-गोपालस्यासन्नकालिकस्तस्मिन्नेव राजवंशे । यथा—वटाटवी (तिरुवालंगाडु) शिलाशासने[4]—

[1] The Saṁkalpasūryodaya, The Adyar Library Series No. 65, Madras, 1948. Page 51.
[2] *Ibid*, Page 51. [3] *Ibid*, Page 491.
[4] Epigraphica Indica Vol. VII. pp. 119-128.

"तस्यैर्रसिद्धिनृपतिः सहजः कनीयान्
दूरं निरस्य कलिमस्य पुनः प्रवेशम् ।
रोद्धुं प्रवृद्ध इव यः प्रचुरं यशः स्वं
दिक्सीमसु स्फटिकसालनिभं बबन्ध ॥
अस्याभवन्नवनिमण्डलरक्षितारः
पुत्रास्त्रयः स्फुरितपौरुषभूषणास्ते ।
यैरन्वितः प्रसविता सुचिरं व्यराज-
त्तेजोमयैरिव निजैर्नयनैस्त्रिनेत्रः ॥
ज्यायानेषां मन्मसिद्धीश्वरः क्ष्मां
क्षाराम्भोधिश्यामसीमां शशास ।
नित्योदञ्चद्यद्यशःपञ्जरान्त-
र्व्योम श्यामं कोकिलत्वं बिभर्ति ॥"

इति । अत्रायं विवक्षितः संततिक्रमः—सिद्धिर्नाम कूटस्थः पुरुषः । तस्यानुजो बेट्टनामकः । तस्य त्रयः पुत्राः—दायभीमः, नल्लसिद्धिः, एर्रसिद्धिश्च । तृतीयस्य एर्रसिद्धेस्त्रयः पुत्राः—मन्मसिद्धिः, बेट्टसिद्धिः, तिम्मसिद्धिश्च । तेषु तिम्मसिद्धेरिदं पूर्वोक्तं शासनम् । तस्य शासनस्य समयः शकसंवत्सरः ११२९ (A.D. 1207). तेषु बेट्टनरपतेः पुत्रेष्वन्यतमस्य नल्लसिद्धेः पुत्रः मन्म-गण्डगोपालदेवः । सिद्धिनाम्नः कूटस्थस्य नरपतेर्वैश्य-तया नल्लसिद्धिप्रभृतीनामनेकेषां राज्ञां सिद्धिरित्युपनामासीदित्यवगम्यते । अतोऽलंकारसंग्रहेऽसकृन्मन्मनाम्ना निर्दिष्टो नरपतिर्मन्मसिद्धिरेव भवितुमर्हति । मन्मसिद्धौ राजनि तिम्मसिद्धिस्तदनुजस्तदाज्ञया पूर्वोक्तं शासनं प्रावर्तयदिति वक्तुं शक्यम् । अतस्तस्य समयोऽपि A.D. 1207 आरभ्य A.D. 1250 पर्यन्तोऽभूदित्यङ्गीकारे न काप्यनुपपत्तिः । परं तु यथा गण्ड-गोपालदेवो विद्याभिवृद्धौ श्रद्धालुर्विद्वत्परिपोषकश्चासीदिति प्रमाणतोऽवगम्यते, न तथा

मन्मसिद्धिः । अधो निर्दिष्टः सुभाषितश्लोको गण्ड-गोपालदेवकर्तृकोऽवगम्यते । यथा—

"काशाः क्षीरनिकाशा दधिशरवर्णानि सप्तपर्णानि ।
नवनीतनिभश्चन्द्रः शरदि च तक्रप्रभा ज्योत्स्ना ॥"[1]

अलंकारसंग्रहस्थानि वचनान्यन्यैर्ग्रन्थकारैरप्युदाहृतानि दृश्यन्ते । यथा—

१. श्रीवेंकटनाथदेशिकैः संकल्पसूर्योदये (1300 A.D.)

"[2]न तच्छास्त्रं न सा विद्या न तच्छिल्पं न ताः कलाः ।
नासौ योगो न तज्ज्ञानं नाटके यन्न दृश्यते ॥"

इति ।

२. [3]अहोबलेन चामृतानन्दीयं वचनमुदाहरतीति पूर्वोक्तः श्लोकोऽवतारितः । तथान्यत्र चाह—"[4]यदाहामृतानन्दः—

"सिद्धिः प्राप्तिर्विचारश्चानुनयस्तदनन्तरम् ।
उद्दिष्टमपि दाक्षिण्यं प्रसिद्धिर्गर्हणं तथा ॥
पश्चात्तापः स्पृहा क्षोभ आक्रन्दः परिहारकः ।
नीतिरुत्तेजनं शोभाभिमानः संशयस्तथा ॥
तुल्यतर्कोऽक्षमा चैव व्यवसायो विमर्शनम् ।
युक्तिः प्रोत्साहनं चैव साहाय्यं च निवेदनम् ॥

[1] Subhāṣitāvali verse, 1797. S'ārṅgadharapaddhati, verse 3906.

[2] Saṁkalpasūryodaya, Adyar Library Series No. 65, Page 51. Compare with Alaṁkārasaṁgraha, Page 94.

[3] Saṁkalpasuryodaya, Adyar Library Series No. 65, Page 51.

[4] *ibid* Page 162. Compare with Alaṁkārasaṁgraha, Page 160.

अभिज्ञानं तथा पृच्छा चातिशयो गुणकीर्तनम् ।
इति त्रिंशदलंकाराः प्रायो नाट्येषु संगताः ॥"

इति ।

३. [1]गौरनार्येण लक्षणदीपिकायाम् (1450 A.D.)—

"नः प्रतापी भयासौख्यमरणक्लेशतापकृत् ।
पवर्गः—इत्यलंकारसंग्रहे"

इति ।

४. साल्वेन [2]रसरत्नाकरे—

"आनार्यैरेन्दे केलिदमृतानन्दियरुद्रभट्टनाकेरदि"

इति । अमृतानन्दनाम्ना प्रथितौ द्वावपरौ ग्रन्थकृतावास्ताम् । एकोऽश्वघोषविरचितस्य बुद्धचरितस्य चरमचतुःसर्ग्या रचयितेत्याधुनिकविमर्शकैः संशयितः[3] । अपरो योगिनीहृदयदीपिकाकारः[4] । अनयोः प्रथमो बौद्धः क्रिस्तुसंवत्सरेष्वेकोनविंशशतकस्यान्तिमे पादेऽवर्तिष्ट । अतस्तस्यैतद्ग्रन्थकर्तुश्चैकत्वसंभावनाया नैवावकाशः । द्वितीयस्तान्त्रिकः पुण्यानन्दनाथशिष्यश्च । योगिनीहृदयदीपिकालंकारसंग्रहयोः परस्परवचनोदाहरणादर्शनेऽपि तद्रचयित्रोरभेदसंभावनोद्बोधकानि कानिचित् प्रमाणान्युपलभामहे । तथाहि—द्वावपि शैवौ शाक्तौ च । अलंकारसंग्रहकारः स्वग्रन्थस्य प्रारम्भे,

[1] D. No. 12952, P. 8695, Vol. 22 of the Des. Cat. of Sanskrit MSS. in the Govt. Oriental MSS. Library Madras—1918.
Compare with Alaṁkārasaṁgraha, Page 4.

[2] Rasaratnākara, Madras University Publication, Kanarese Series No. 2, Madras 1932. Page 2.

[3] Introduction to the Buddhacarita, edited by E. B. Cowell. Oxford—1893.

[4] Published in the Sarasvati Bhavanam Series No. 7, Banares—1924.

"[1]जगद्वैचित्र्यजननजागरूकपदद्वयम् ।
अवियोगरसाभिज्ञमाद्यं मिथुनमाश्रये ॥"

इत्यर्धनारीश्वरं नमस्यति । एवं तत्रैव

"[2]अवोचदमृतानन्दमादरेण कवीश्वरम् ।"
"मया तत्प्रार्थितेनेत्थममृतानन्दयोगिना ॥"

इत्यात्मानं कविं योगिनं च निर्दिशति । तथा "इत्यमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे" इति परिच्छेदान्तेषु योगिप्रवरबिरुदेनात्मानं निर्दिशति । योगिनीहृदयदीपिकाकारश्च तस्मिन् ग्रन्थे महाकविवचनानामनेकेषां परिशीलनेन सहृदयहृदयावर्जन्या ग्रन्थरचनाशैल्या चात्मनः कवीश्वरतामाविष्करोति । तथा पटलान्तेषु "इत्यमृतानन्दयोगिप्रवरविरचितायां योगिनीहृदयदीपिकायाम्" इति योगिप्रवरबिरुदेनात्मानं निर्दिशन्न केवलमात्मनो योगिप्रवरत्वं, किंत्वलंकारसंग्रहकर्त्रभेदं च विवक्षतीव । योगीश्वरस्याप्यालंकारिकत्वमत्रालंकारसंग्रहारम्भे कर्त्रा स्ववचनेनैवाभ्युपगतमिति नात्र मात्रयापि विमन्तव्यं विमर्शकैः । अतश्च योगिनीहृदयदीपिकालंकारसंग्रहयोरेककर्तृकत्वोद्भावनं संभवद्युक्तिकमेवेति यावन्न बाधस्तावत् साधु । कन्नडवैद्यनिघण्टुकारोऽमृतानन्दीति कश्चनावर्तत[3] । स तु जैनः सुतरामस्माद्भिन्न इति न तत्र शङ्कावकाशः । अलंकारसंग्रहप्रारम्भे "भक्तिभूमिपतिः शास्ति भवपादाब्जषट्पदः[4]" इति निर्देशात् मन्मभूपतेः पिता भक्तिभूपतिः शिवभक्त इति विज्ञायते । अत्र "भवपादाब्जषट्पदः" इत्यस्य स्थाने 'जिनपादाब्जषट्पदः' इति पाठान्तरं कोशान्तरे दृष्टमिति पण्डितवर्येण

[1] Alaṁkārasaṁgraha, Page 1.
[2] Alaṁkārasaṁgraha, P. 2.
[3] The Karnāṭakakavicarite by R. Narasiṁhacarya, Mysore University Publications, Bangalore, 1942. Vol. I., Page 408.
[4] Alaṁkārasaṁgraha, P. 1.

शेषय्यंगार्येणोच्यते। अस्माभिरुपलब्धेषु सर्वेष्वपि कोशेषु भवपादाब्जेति पाठ एवोपलब्ध इति जिनपादाब्जेति काचित्के पाठे नातीव श्रद्धा विहिता।

अलंकारसंग्रहे ग्रन्थकर्त्रानेन नाम्ना निर्दिष्टा ग्रन्थाश्चेमे—१. मारीचवञ्चनम्, २. वालिवधः, ३. उदात्तराघवः, ४. नलविजयः, ५. देवीपरिणयः, ६. त्रिपुरदाहः, ७. अम्भोधिमन्थनम्, ८. मदनलेखा, ९. मेनकानहुषम्, १०. स्तम्भितारम्भम्, ११. रैवतमदनिका, १२. कनकवतीमाधवम्, १३. शृङ्गारललितम्, १४. केलिरैवतकम्, १५. महावीरचरितम्, १६. वेणीसंहारम्, १७. शाकुन्तलम्, १८. बालरामायणम्, १९. विक्रमोर्वशीयम्, २०. कामदत्ता, २१. माधवोदयः, २२. मेनकाद्विजम्, २३. क्रीडारसालम्, २४. वीणावती, २५. बिन्दुमती, २६. विलासवती चेति।

वे. कृष्णमाचार्यः

CONTENTS

ERRATA

Page	Line	Reading
२	३	संकीर्णांस्तत्र
११	१	रसोदयः
१६	२	पाणिं
१७	७	चिन्ताद्याः
३०	१२	खेदोऽस्मासु
३२	१५	स्वाधीन
३४	१७	वीक्षमाणाः
३६	१४	वलितापाङ्गां
३८	७	रात्रौ रात्रा
४५	१०	उत्प्रेक्षाः
४६	१०	एकत्वरूपणं
४९	८	तुन्दिलापया
५३	११	शिरश्छेद
५४	४	मानसगराज
,,	५	विशेषोक्तिः
६३	१३	नादातृवाचकम
८५	४	सममंस्त
८६	१७	रोमोद्गमा
८८	१९	वासरवधः
८९	३	गर्हितमपि
११९	४	साक्षिणि
१२९	१५	ज्येष्ठमध्या
१३३	४	अष्टादशभिः
१३८	१२	मारीचवञ्चनम्
१७०	१४	आर्या
१९१	७	आयत्तरमणा

अलंकारसंग्रहः

अमृतानन्दयोगिकृतः

प्रथमः परिच्छेदः

मङ्गलाचरणम्—

जगद्वैचित्र्यजननजाकरूकपदद्वयम् ।
[1]अवियोगरसाभिज्ञमाद्यं मिथुनमाश्रये ॥ १ ॥
[2]विद्वज्जनमनःकान्तकैरवानन्दकौमुदीम् ।
नमामि शारदां देवीं नामरूपाधिदेवताम् ॥ २ ॥

उपोद्घातः—

उद्दामफलदामुर्वीमुर्वीमुदधिमेखलाम् ।
भक्तिभूमिपतिः शास्ति भवपादाब्जषट्पदः ॥ ३ ॥
तस्य [3]पुत्रस्त्यागमहासमुद्रबिरुदाङ्कितः ।
सोमसूर्यकुलोत्तंसो महितो [4]मन्नभूपतिः ॥ ४ ॥
[5]स कदाचित्सभामध्ये काव्यालापकथान्तरे ।
[6]अवोचदमृतानन्दमादरेण कवीश्वरम् ॥ ५ ॥

[1] अनियोग G. 2.
[2] समुल्लासरसाकारां तत्त्वकैरवकौमुदीम् G. 1.
[3] पुत्रश्चागमवित्समुद्र etc. G. 1.
[4] मन्व G. 1.
[5] सत्काव्यवित् G. 1.
[6] अपृच्छत् A.

वर्णशुद्धिं वाक्यवृत्तिं रसान् भावाननन्तरम् ।
नेतृभेदानलंकारान् दोषानपि च तद्गुणान् ॥ ६ ॥
[1]नाट्यधर्मान् [2]रूपकोपरूपकाणां भिदा अपि ।
चाटुप्रबन्धभेदांश्च संकीर्णांस्तत्र तत्र तु ॥ ७ ॥
संचित्यैकत्र कथय सौकर्याय सतामिति ।
मया तत्प्रार्थितेनेत्थममृतानन्दयोगिना ॥ ८ ॥
तन्त्रान्तरोदितानर्थान् वाक्यान्येव[3] क्वचित्क्वचित् ।
संचित्य क्रियते सम्यक् सर्वालंकारसंग्रहः ॥ ९ ॥

वर्णपदादिविभागः—

अकारादिक्षकारान्ता [4]वर्णाः स्युः पदतां गताः ।
पदानि द्विविधानि स्युः सुप्तिङन्तविभेदतः ॥ १० ॥
संचयान् सुप्तिङन्तानां वाक्यान्याहुर्विपश्चितः ।

काव्यलक्षणादि—

तान्येव कविक्लृप्तानि सार्थानि [5]सगुणानि च ॥ ११ ॥
सालंकाराणि निर्दोषाण्याहुः [6]काव्यं महर्षयः ।
पद्यं गद्यं च मिश्रं च त्रिविधं काव्यमुच्यते ॥ १२ ॥
पद्यं तु च्छन्दसा बद्धं गद्यं वाक्यकदम्बकम् ।
गद्यपद्यात्मकं मिश्रं नाटकादिकमुच्यते ॥ १३ ॥
सर्गबन्धं संस्कृतेन साश्वासं प्राकृतेन तु ।
तद्द्वयं [7]च महाकाव्यं सेतुरामायणादिकम् ॥ १४ ॥

[1] नाट्यभेदान् G. 1. [2] नाटकोप G. 1. [3] वाक्येनैव G. 1.
[4] वर्णास्तु G. 1. [5] सरसानि च G. 1. [6] सर्वे विपश्चितः G. 1.
[7] तु G. 1.

गद्यं तु गदितं द्वेधा कथा चाख्यायिकेति च ।
कथा कल्पितवृत्तान्ता सत्यार्थाख्यायिका मता ॥ १५ ॥
[1]उच्छ्वासलम्बकाद्याढ्यं गद्यते गद्ययोर्द्वयम्[2] ।
मिश्रमङ्काद्यङ्कितं स्याद्भाषाभिर्बहुभिर्युतम् ॥ १६ ॥
आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम् ।
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ॥ १७ ॥
उद्यानसलिलक्रीडामधुपानरतोत्सवैः ।
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ॥ १८ ॥
मन्त्रद्यूतप्रयाणाजिनायकाभ्युदयैरपि ।
अलंकृतमसंक्षिप्तं रसभावनिरन्तरम् ॥ १९ ॥
चतुर्वर्गफलायत्तं चतुरोदात्तनायकम् ।
काव्यं कल्पान्तरस्थायि कल्पतेऽनल्पभूतये ॥ २० ॥

छन्दः—

छन्दो यरतमैर्व्याप्तं तथा भजसनैरपि ।

गणाः—

गुरुणा लघुना व्याप्ता गणास्तल्लक्षणं यथा ॥ २१ ॥
आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥ २२ ॥

वर्णगणविचारः—

[3]वर्णं गणं च काव्यस्य मुखे कुर्यात्सुशोभनम् ।
कर्तृनायकयोस्तेन कल्याणमपि जायते ॥ २३ ॥
अन्यथानिष्टसंपत्तिरनयोरेव संभवेत् ।

[1] उच्छ्वासस्तबकाद्याढ्यं G. 1. [2] द्वयोः G. 2. [3] वर्णान् गणांश्च A.

तद्वर्णानां गणानां च शुद्धिर्ज्ञेया क्रमाद्यथा ॥ २४ ॥
आभ्यां भवति संप्रीतिर्मुदीभ्यां धनमूद्वयात् ।
ऋभ्यां ऌभ्यामपख्यातिरेचः सुखकरा मताः ॥ २५ ॥
बिन्दुसर्गङञाः सन्ति पदादौ न कदाचन ।
चतुर्भ्यः कादिवर्णेभ्यो लक्ष्मीरपयशस्तु चात् ॥ २६ ॥
प्रीतिः सौख्यं च छान्मित्रलाभौ जो भयमृत्युकृत् ।
झष्टठाभ्यां खेददुःखे शोभाशोभाकरौ डढौ ॥ २७ ॥
भ्रमणं णात्सुखं तात्तु थाद्युद्धं सुखदौ दधौ ।
नः प्रतापी भयासौख्यमरणक्लेशदाहकृत् ॥ २८ ॥
पवर्गो यस्तु लक्ष्मीदो रो दाही व्यसनं लवौ ।
शः सुखं तनुते षस्तु खेदं सः सुखदायकः ॥ २९ ॥
हो दाहकृद्व्यसनदो ळः क्षः सर्वसमृद्धिदः ।
एवं प्रत्येकतः प्रोक्तं वर्णानां वास्तवं फलम् ॥ ३० ॥
संयोगः [1]सर्वथा त्याज्यो वर्णानां [2]क्षं विना मुखे ।
शुद्धमप्यन्यसंयुक्तमशुद्धमुपजायते ॥ ३१ ॥
यथा मधु घृतोन्मिश्रं विषतामेति वीर्यतः ।
गणानां [3]तु फलं ज्ञेयं प्रत्येकं प्रोच्यते यथा ॥ ३२ ॥
यो वारिरूपो धनकृद्रोऽग्निर्दाहभयंकरः ।
ऐश्वर्यदो [4]नाभसस्तो भः [5]सौम्यः सुखदायकः[6] ॥ ३३ ॥
जः सूर्यो रोगदः प्रोक्तः सो वायव्यः क्षयप्रदः ।

[1] सर्वदा A.
[2] कविना G. 1.
[3] लक्षणं A.
[4] नाभसस्तु G. 1.
[5] सौख्यं G. 1.
[6] शशिदैवतः G. 1.

शुभदो मो भूमिमयो नो गौर्धनकरो मतः ॥ ३४ ॥
देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥ ३५ ॥
[1]एवं वर्णगणव्याप्तिः समाना गद्यपद्ययोः ।
संस्कृते प्राकृतादौ च विज्ञेया विबुधोत्तमैः ॥ ३६ ॥
एवं विनिश्चितविनिर्मलवर्णवाक्यै-
र्हृद्यानवद्यरचितैर्नवगद्यपद्यैः ।
स्फूर्तिं प्रयातु भवतो भुवनेषु कीर्तिः
कौतूहलानि तव सन्तु वराङ्कभीम ॥ ३७ ॥

इति [2]श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे
वर्णगणविचारो नाम प्रथमः परिच्छेदः ॥

---

[1] इति G. 1.

[2] अमृतानन्दविरचिते सर्वालंकारसंग्रहे A

द्वितीयः परिच्छेदः

कविः—

एवं वर्णगणव्याप्तिविचारणविचक्षणः ।
कवित्वकारणस्तोमसंपन्नः कविरुच्यते ॥ १ ॥

कविभेदाः—

रौचिको वाचिकश्चार्थः शिल्पिको मार्दवानुगः ।
[1]विवेकी भूषणार्थी च कवयः सप्त कीर्तिताः ॥ २ ॥
[2]आवापोद्धारकृद्यावन्मनसो रुचिरात्मनः ।
रौचिको वाचिकः शुद्धवागाडम्बरकारकः ॥ ३ ॥
आर्थोऽभिधेयचित्रार्थी[3] शिल्पिकः शब्दचित्रकृत् ।
शब्दार्थमार्दवापेक्षी कविः स्यान्मार्दवानुगः ॥ ४ ॥
शब्दार्थगुणदोषज्ञो महाकविमतानुगः ।
[4]शास्त्रालंकारसंस्कारी विवेकी कविपुंगवः ॥ ५ ॥
अलंकारैकनिघ्नो[5] यो भूषणार्थी बुधैर्मतः ।

कवितानिदानम्—

शक्तिर्निदानं काव्यस्य [6]कथ्यते काव्यवेदिभिः[7] ॥ ६ ॥
शब्दच्छन्दोऽभिधानादिशास्त्रलोकावलोकनम्[8] ।

[1] कविपुंगवो भूषार्थी A.

[2] आवापोद्वापकृत् G. 1.

[3] चित्रार्थः A.

[4] शास्त्रालंकारशब्दार्थकौतुकी A.

[5] निष्ठो A.

[6] गद्यते A.

[7] कोविदैः G. 1.

[8] सर्वशास्त्रावलोकनम् A.

नैपुणं कविशिक्षा च त्रितयं काव्यकारणम् ॥ ७ ॥
न जातु जायते काव्यं यां विना कारणैरपि ।
शब्दच्छन्दोऽभिधानाद्यैः सा शक्तिरभिधीयते ॥ ८ ॥
[1]सा देवताप्रसादाच्च कल्प्यते कविसंततेः ।
शब्दच्छन्दोऽभिधानानां न विधिः संग्रहादिह ॥ ९ ॥
तेषां स्वरूपमन्यत्र बोद्धव्यं बुद्धिशालिभिः ।

चतुर्विधा वाक्यार्थाः—

वाक्यानां कविक्लृप्तानामर्थाः प्रोक्ताश्चतुर्विधाः ॥ १० ॥
मुख्यो लक्ष्यस्तथा गौणो व्यङ्ग्यश्चेतीह कथ्यते ।
स मुख्यः कथितः साक्षात्संकेतेनाभिधीयते ॥ ११ ॥
जातिक्रियागुणद्रव्यभेदात्सोऽपि चतुर्विधः ।
गौश्चलो धवलो डित्थ इत्युदाहरणं मतम् ॥ १२ ॥
वाच्यार्थानुपपत्तौ यस्तत्संबन्धी प्रतीयते ।
प्रयोजनवशादन्यो लक्ष्योऽर्थो लक्षणा त्रिधा ॥ १३ ॥
वाच्यार्थस्य परित्यागादन्योऽर्थो यत्र लक्ष्यते ।
सा जहल्लक्षणा ज्ञेया गङ्गायां घोष इत्यसौ ॥ १४ ॥
वाच्यार्थस्यापरित्यागादन्योऽर्थो यत्र लक्ष्यते ।
अजहल्लक्षणा कुन्ताः प्रविशन्तीति सा मता ॥ १५ ॥
जहती चाप्यजहती स्वार्थं या तूभयात्मिका ।
सा छत्रिणो व्रजन्तीति [2]ह्यत्रोदाहरणं मतम् ॥ १६ ॥
एकेन च्छत्रिणान्येषां छत्रित्वमिह [3]साधनात् ।

1 जातमप्यपहासाय कल्पते G. 1.

2 तत्रोदाहरणं A.

3 लक्ष्यते A.

द्वितीयः परिच्छेदः

कविः—

एवं वर्णगणव्याप्तिविचारणविचक्षणः ।
कवित्वकारणस्तोमसंपन्नः कविरुच्यते ॥ १ ॥

कविभेदाः—

रौचिको वाचिकश्चार्थः शिल्पिको मार्दवानुगः ।
[1]विवेकी भूषणार्थी च कवयः सप्त कीर्तिताः ॥ २ ॥
[2]आवापोद्धारकृद्यावन्मनसो रुचिरात्मनः ।
रौचिको वाचिकः शुद्धवागाडम्बरकारकः ॥ ३ ॥
आर्थोऽभिधेयचित्रार्थी[3] शिल्पिकः शब्दचित्रकृत् ।
शब्दार्थमार्दवापेक्षी कविः स्यान्मार्दवानुगः ॥ ४ ॥
शब्दार्थगुणदोषज्ञो महाकविमतानुगः ।
[4]शास्त्रालंकारसंस्कारी विवेकी कविपुंगवः ॥ ५ ॥
अलंकारैकनिघ्नो[5] यो भूषणार्थी बुधैर्मतः ।

कवितानिदानम्—

शक्तिर्निदानं काव्यस्य [6]कथ्यते काव्यवेदिभिः[7] ॥ ६ ॥
शब्दच्छन्दोऽभिधानादिशास्त्रलोकावलोकनम्[8] ।

[1] कविपुंगवो भूषार्थी A.
[2] आवापोद्वापकृत् G. 1.
[3] चित्रार्थः A.
[4] शास्त्रालंकारशब्दार्थकौतुकी A.
[5] निष्ठो A.
[6] गद्यते A.
[7] कोविदैः G. 1.
[8] सर्वशास्त्रावलोकनम् A.

नैपुणं कविशिक्षा च त्रितयं काव्यकारणम् ॥ ७ ॥
न जातु जायते काव्यं यां विना कारणैरपि ।
शब्दच्छन्दोऽभिधानाद्यैः सा शक्तिरभिधीयते ॥ ८ ॥
[1]सा देवताप्रसादाच्च कल्प्यते कविसंततेः ।
शब्दच्छन्दोऽभिधानानां न विधिः संग्रहादिह ॥ ९ ॥
तेषां स्वरूपमन्यत्र बोद्धव्यं बुद्धिशालिभिः ।

चतुर्विधा वाक्यार्थाः—

वाक्यानां कविक्लृप्तानामर्थाः प्रोक्ताश्चतुर्विधाः ॥ १० ॥
मुख्यो लक्ष्यस्तथा गौणो व्यङ्ग्यश्चेतीह कथ्यते ।
स मुख्यः कथितः साक्षात्संकेतेनाभिधीयते ॥ ११ ॥
जातिक्रियागुणद्रव्यभेदात्सोऽपि चतुर्विधः ।
गौश्चलो धवलो डित्थ इत्युदाहरणं मतम् ॥ १२ ॥
वाच्यार्थानुपपत्तौ यस्तत्संबन्धी प्रतीयते ।
प्रयोजनवशादन्यो लक्ष्योऽर्थो लक्षणा त्रिधा ॥ १३ ॥
वाच्यार्थस्य परित्यागादन्योऽर्थो यत्र लक्ष्यते ।
सा जहल्लक्षणा ज्ञेया गङ्गायां घोष इत्यसौ ॥ १४ ॥
वाच्यार्थस्यापरित्यागादन्योऽर्थो यत्र लक्ष्यते ।
अजहल्लक्षणा कुन्ताः प्रविशन्तीति सा मता ॥ १५ ॥
जहती चाप्यजहती स्वार्थं या तूभयात्मिका ।
सा छत्रिणो व्रजन्तीति [2]ह्यत्रोदाहरणं मतम् ॥ १६ ॥
एकेन च्छत्रिणान्येषां छत्रित्वमिह [3]साधनात् ।

[1] जातमप्युपहासाय कल्पते G. 1.
[2] तत्रोदाहरणं A.
[3] लक्ष्यते A.

स गौणो गुणसादृश्यादन्योऽर्थो यः प्रतीयते ॥ १७ ॥
उदाहरणमेतस्य सिंहो माणवको यथा ।
मुख्यार्थबाधे तद्योगाद्व्यङ्ग्यो लक्ष्यस्य यत्फलम् ॥ १८ ॥
नायं मुख्यो न वा लक्ष्यो लक्षणायाः फलं यतः ।
गङ्गा मुख्यस्तटं लक्ष्यो व्यङ्ग्यं शीतलतादिकम् ॥ १९ ॥
अनेकवाचकः शब्दो [1]यत्रावाच्यं व्यनक्ति तत् ।
व्यञ्जनं त्वभिधामूलं संयोगादिभिरुच्यते ॥ २० ॥

अर्थनिर्णायकाः—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं [2]लिङ्गं शब्दस्यान्यस्य संनिधिः ॥ २१ ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ २२ ॥
सवज्रो हरिरित्यत्र योगादिन्द्रः प्रतीयते ।
अवज्रो हरिरित्यत्र वियोगादपि वासवः ॥ २३ ॥
साहचर्याद्दाशरथौ रामलक्ष्मणयोरिति ।
रामोऽर्जुनविरोधीति विरोधाद्भार्गवो मतः ॥ २४ ॥
स्थाणुं भज जगद्वन्द्यमित्यर्थेन शिवो मतः ।
युष्मदर्थः प्रकरणाद्देवो जानाति मामिति ॥ २५ ॥
कन्तुर्मीनध्वज इति लिङ्गात्कामः प्रतीयते ।
देवः पुरारिरित्यन्यशब्दसंनिधितः शिवः ॥ २६ ॥
मत्तः पिको मधावत्र सामर्थ्यात्सुरभावृतौ ।
औचित्यात्पातु वः शंभुरिति सांमुख्यमिष्यते ॥ २७ ॥

[1] यत्र वाच्यं G. 2.   [2] लिङ्गमन्यशब्दस्य A.

अत्र देवो राजतीति देशाद्राजावगम्यते ।
चित्रभानुर्विभातीति कालेनार्थोऽवसीयते ॥ २८ ॥
रात्रौ चेदनलो ज्ञेयो दिवा चेत्तिग्मदीधितिः ।
मित्रं विभातीति सुहृन्मित्रो भातीति भास्करः ॥ २९ ॥
पुंनपुंसकयोर्व्यक्त्या[1] व्यज्यते तौ यथाक्रमम् ।
स्वरेण व्यक्तिरर्थस्य वेदे काव्येषु न क्वचित् ॥ ३० ॥
एतावन्मात्रनेत्रेति चेष्टयार्थोऽवगम्यते[2] ।
अर्थाश्च व्यञ्जकास्तस्य सहकारितया मताः ॥ ३१ ॥
निलीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः ।
विकसन्त्या च मालत्या गतोऽस्तं ज्ञायते रविः ॥ ३२ ॥
[3]वक्तात्र यजमानश्चेत्कालो होमस्य गम्यते ।
विटश्चेदत्र बोद्धव्यो वेश्याभिगमनोद्यमः ॥ ३३ ॥
चपले लोचने नालं मनश्चलयितुं मम ।
इत्यर्थव्यक्तिरेतस्मिन् काक्वा वाक्येऽवसीयते ॥ ३४ ॥
इत्यादिरेषां विस्तारः संग्रहादिह नोच्यते ।
दिङ्मात्रं दर्शितं प्राज्ञैरनुक्तमवगम्यताम् ॥ ३५ ॥
विविधविहितवाक्यवृत्तिभेदैः कविवरकल्पितनव्यकाव्यबन्धैः[4] ।
प्रभवतु भवतः प्रतापभानुः समरनिरङ्कुश नूत्नसाहसाङ्क ॥३६॥

इति [5]श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे
शब्दार्थनिर्णयो नाम द्वितीयः परिच्छेदः ।

---

[1] व्यक्तौ G. 1.
[2] विभाव्यते G. 1.
[3] द्रष्टात्र G. 1.
[4] पद्यकाव्यबन्धैः G. 1.
[5] सर्वालंकारसंग्रहे A.

तृतीयः परिच्छेदः

आत्मनो मनसा योगे मनसस्त्विन्द्रियैः सह ।
इन्द्रियाणां तत्तदर्थैरिति ज्ञानोदयक्रमः ॥ १ ॥

रसः—

ज्ञायमानैर्विभावाद्यैर्व्यक्तः स्थायी रसः स्मृतः ।
भावस्तु मनसो वृत्तिभेदः स्थैर्यमुपेयिवान् ॥ २ ॥

स्थायिभावभेदाः—

रतिर्हासस्तथा शोकः क्रोधोत्साहौ भयं तथा ।
जुगुप्साविस्मयशमाः स्थायिभावा नव क्रमात् ॥ ३ ॥

रसभेदः—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताख्या रसभेदा नव क्रमात् ॥ ४ ॥

शृङ्गाररसः—

पोष्यमाणा रतिर्भावैः शृङ्गार इति गीयते[1] ।
एवमेव स्थायिनोऽन्ये रसतां प्राप्नुवन्ति हि ॥ ५ ॥

रसोत्पत्तिः—

नवनीतं यथा पाकाद् घृतत्वं प्रतिपद्यते ।
श्रूयमाणैर्विभावाद्यैः काव्येषु रससंभवः ॥ ६ ॥

[1] कथ्यते G. 1.

दृश्यमानैः सदस्यानां नाटकेषु रसादयः ।

रसपोषकाः—

विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ॥ ७ ॥
श्रोतॄणां प्रेक्षकाणां च ते सर्वे रसपोषकाः ।

विभावभेदः—

आलम्बनत्वेनोद्दीपनत्वेन[1] द्विविधा मताः ॥ ८ ॥
विभावा यैर्विशेषेण रसव्यक्तिर्विभाव्यते ।
आलम्बनविभावः स यमालम्ब्य रसोदयः ॥ ९ ॥
उद्दीप्यते रसो भावैर्यैस्त [2]उद्दीपना मताः ।

अनुभावाः—

उत्पन्नो यै रसो भावैर्भावुकैरनुभूयते ॥ १० ॥
तेऽनुभावाः [3]प्रकथ्यन्ते विकारा अङ्गसंभवाः ।

सात्त्विकभावाः—

सत्त्वं नाम मनोवृत्तिः सात्त्विकास्तत्समुद्भवाः ॥ ११ ॥
स्तम्भः स्वेदोऽथ रोमाञ्चलयौ वैस्वर्यवेपथू ।
अश्रुवैवर्ण्यमित्यष्टौ भावाः प्रोक्ता मनीषिभिः ॥ १२ ॥

व्यभिचारिभावाः—

भावे स्थायिन्यनैकान्त्याच्चरन्तो व्यभिचारिणः ।
उत्पद्यन्ते विलीयन्ते वारिधाविव वीचयः ॥ १३ ॥
निर्वेदग्लानिशङ्काश्रमधृतिजडताहर्षदैन्यौग्र्यचिन्ता-
त्रासेर्ष्यामर्षगर्वस्मृतिमरणमदाः सुप्तिनिद्रावबोधाः ।

[1] द्दीपनत्वाद्विभावो द्विविधो मतः G. 1. [2] उद्दीपनो मतः G. 1.
[3] प्रकीर्त्यन्ते G. 1.

व्रीडापस्मारमोहास्त्वमतिरलसतावेगतर्कावहित्था
व्याद्ध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते त्रयश्च ॥१४॥

रसाश्रयाः—

नटेषु रसभावानामारोप्यत्वादतत्त्वतः ।
रसः सामाजिकेष्वेव [1]स स्वभावरसः स्मृतः ॥ १५ ॥
प्राणिनामपि सर्वेषां लोके [2]स्वाभाविको रसः ।

शृङ्गारे विभावादयः—

अन्योन्यालम्बनत्वं स्यात्कान्ताकामुकयो रसे ॥ १६ ॥
उद्दीपनाः स्युः शृङ्गारे चन्द्रिकोपवनादयः ।
अनुभावाः प्रकीर्त्यन्ते कटाक्षक्षेपणादयः ॥ १७ ॥
स्तम्भादयः सात्त्विकाः स्युर्दर्शनस्पर्शनादिषु ।
निर्वेदाद्या यथायोगं योज्याः संचारिणोऽपि च ॥ १८ ॥

शृङ्गारभेदः—

संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ।
संभोगः संनिकर्षः स्याद्भाषणाद्यैर्मिथो यथा ॥ १९ ॥

संभोगशृङ्गारः—

"व्रीडाकातरलोचनं विनमितं वक्त्रं विशद्वेपथू
हस्तौ हल्लकसोदरौ पुलकितैः स्पृष्टौ तवेमौ स्तनौ ।
तन्वी तारकिता तनुस्तनुतरैः स्वेदाम्भसां शीकरै-
र्भावो भावजराज्यलक्ष्मि विदितो बाह्यैरलं डम्बरैः ॥"

[1] स्वस्वभावरसः स्मृतेः G. 1.

[2] स्वाभाविका रसाः A.

विप्रलम्भश्रृङ्गारः—

विप्रलम्भोऽभिलाषेर्ष्याप्रवासाद्यैरनेकधा ।
उदाहरणमेतेषामष्टावस्थासु लक्ष्यते ॥ २० ॥

दश दशाः—

रत्युल्लाससमुद्भूता विद्यन्तेऽत्र दशा दश ।
चक्षुःप्रीतिर्मनःसक्तिः संकल्पो जागरस्तथा ॥ २१ ॥
तनुता विषयद्वेषस्त्रपानाशस्ततः परम् ।
मोहो मूर्च्छा मृतिरिति विज्ञेयाः प्रथमा यथा ॥ २२ ॥
आदराद्वीक्षणं यत्र चक्षुःप्रीतिः प्रशस्यते ।

चक्षुःप्रीतिः—

सामिप्रफुल्लसरसीरुहकोणनिर्य-
न्मत्तद्विरेफमहिलागतिगर्वचोरैः ।
लज्जालसैर्ललितभावभवैः कटाक्षैः
सा त्वामवैक्षत सखी मम **मन्नभूप** ॥

मनःसक्तिः—

चित्तासक्तिर्मुहुश्चिन्ता प्रतिकृत्यादिभिर्यथा ॥ २३ ॥

त्वां **मन्नभूप** लिखितुं त्रपयासमर्था
सा संनिधौ मम चिरादलिखद्विचिन्त्य ।
पद्मद्वयं करिकरौ गगनं कवाटं
साम्भोरुहं युगयुगं शशिनं तमश्च ॥

संकल्पः—

मनोरथैः प्रियावाप्तिः संकल्पः कथितो यथा ।

आमीलिताक्षमलकाकुलफालभाग-
मास्विन्नगण्डमधरस्फुरणाभिरामम् ।

पाणौ निधाय वदनं परभागशालि
मन्नक्षितीश रतिमेति मनोरथैः सा ॥

जागरः—

प्रियानवाप्त्या तच्चिन्तासातत्याज्जागरो यथा ॥ २४ ॥

राकाविधोरपि रवेरविशेषतापात्
सा जागरादपि सखी मम **मन्नभूप** ।
जानाति नान्तरमनन्यजबाणजालै-
र्दीना निशादिवसयोर्दिननाथवंश्य ॥

तनुता—

तदलाभात्तनोः कामज्वरेण तनुता यथा ।

भक्तीशनन्दन भवद्विरहे मृगाक्षी
मन्नक्षितीश मदनज्वरकर्शिताङ्गी ।
लब्धुं त्वदीयहृदये ललितेऽवकाशं
कार्श्यं निजं कलयते कमनीयमेव ॥

विषयद्वेषः—

अर्थान्तरासहिष्णुत्वं विषयद्वेषणं यथा ॥ २५ ॥

आलापमालिनिकरस्य निशम्य भीता
मुग्धा विलोक्य वदनं मुकुरं जहाति ।
मन्दं न निश्वसिति मन्मथवेदनार्ता
कीरेन्दुमारुतधिया किमु **मन्नभूप** ॥

त्रपानाशः—

मानत्यागस्त्रपानाशो गौरवागणनाद्यथा ।

मन्दा वहन्ति मलयाचलगन्धवाहा
मत्ता नदन्ति मकरन्दरसेन भृङ्गाः ।

मानं जहाति मदनाशुगपातभीता
मन्नक्षितीश भजते न मरालयानम् ॥

मोहः—

उन्मादश्चित्तवैकल्यान्मोह इत्युच्यते यथा ॥ २६ ॥

आलोलपल्लववतीमवलम्ब्य शाखा-
मागम्यतामिति शनैरनुनीय चूतम् ।
नेत्राम्बु सा त्यजति नेतुमपारयन्ती
कोपेन मन्ननृपते कोमराङ्कभीम ॥

मूर्च्छा—

आहुरिन्द्रियवैकल्यान्मूर्च्छा ज्ञानक्षयो यथा ।

मुग्धा मुहुः पिहितमन्मथबाणपीडां
मूर्च्छां सखी मृगयते मम मन्नभूप ।
विज्ञातवेदनविशेषतया विवेकं
नाङ्गीकरोति नयने विनिमीलयन्ती ॥

मृतिः—

क्षणान्तरे प्राणहानिः प्रियालाभान्मृतिर्यथा ॥ २७ ॥

पुण्यं पुरातनमिहास्ति यदि त्वदीय-
मङ्कं विशङ्कमधिरोढुमरालकेश्याः ।
कामो नयेन्न दशमीमियताप्यवस्थां
कालेन मन्ननृपते करुणापरस्ताम् ॥

हास्यरसः—

हास एव विभावाद्यैः पुष्टो हास्यत्वमागतः ।
विदूषकादिरालम्बो भावो हास्यरसे यथा ॥ २८ ॥

"संमार्जनीसततसंगमनादपूतं
पणिं पवित्रितकचे बहुतीर्थतोयैः ।
मन्मस्तकेऽर्पितवती मधुपानमत्तां
वित्तस्य दानमिह किंनु विमाननाय ॥"

उद्दीपनविभावाः स्युस्तद्भाषाकारविक्रियाः ।
भावुकाक्षिविकाराद्या अनुभावाः प्रकीर्तिताः ॥ २९ ॥
अश्रुवैवर्ण्यवैस्वर्यप्रमुखाः सात्त्विकाः स्मृताः ।
अत्र हर्षाश्रुपातादिभावाः संचारिणो मताः ॥ ३० ॥
उत्तमादिविभेदेन त्रिधा हास्यरसो मतः ।
स्मितं च हसितं चैतावनुभावाविहोत्तमे ॥ ३१ ॥
आद्यं विकासिगण्डं स्यादीषल्लक्ष्यरदं परम् ।
मध्यमे स्याद्विहसितं तथोपहसितं परम् ॥ ३२ ॥
मृदुस्वनं स्यात्प्रथमं शिरःकम्प्यपरं मतम् ।
अधमेऽत्रावहसितं तथातिहसितं मतम् ॥ ३३ ॥
शिरःकम्पाश्रुमत्पूर्वं विक्षिप्ताङ्गं द्वितीयकम् ।

करुणरसः—

शोक एव विभावाद्यैः पुष्टः करुणतां गतः ॥ ३४ ॥
इष्टनाशादनिष्टाप्तेः करुणो द्विविधो रसः ।
नष्टो वानिष्टयुक्तो वा बन्धुरालम्बनं यथा ॥ ३५ ॥

"कस्तवाद्य करमर्पयेत्सुतो नाथ नष्टनयनोऽसि सांप्रतम् ।
हन्त वीतकरुणो हठात्कथं यष्टिमन्धविधृतां यमोऽहरत् ॥"

"नृपतितनयभृत्यैस्तुद्यमानो नृशंसैः
पथि जनवति पश्चात्पाशबद्धस्वबाहुः ।

निशमयत निरागा नीयते हा निहन्तुं
कमलजकुलजातः कैरवः कातरात्मा ॥ ”

उद्दीपनविभावाः स्युः स्वजनाक्रन्दनादयः ।
अनुभावास्तु निश्वासविलापरुदितादयः ॥ ३६ ॥
स्तम्भाश्रुपातवैस्वर्यप्रमुखाः सात्त्विकाः स्फुटाः ।
अत्रापस्मारदीनत्वमरणालस्यसंभ्रमाः ॥ ३७ ॥
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ।

रौद्ररसः—

क्रोध एव विभावाद्यैः पुष्टो रौद्रत्वमाप्तवान् ॥ ३८ ॥
मात्सर्यादपि च द्वेषाद्रौद्रोऽपि द्विविधो यथा ।

“ आजन्म ब्रह्मचारी पृथुलभुजशिलास्तम्भविभ्राजमान-
ज्याघातश्रेणिरेखान्तरितवसुमतीचक्रजैत्रप्रशस्तिः ।
वक्षःपीठे घनास्त्रव्रणकिणकठिने संक्ष्णुवानः पृषत्कान्
प्राप्तो राजन्यगोष्ठीवनगजमृगयाकौतुकी जामदग्न्यः ॥ ”

“ कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
महमयमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥ ”

आलम्बनविभावौ द्वौ मात्सर्यद्वेषगोचरौ ॥ ३९ ॥
उद्दीपनविभावाः स्युस्तद्भाषाचेष्टितादयः ।
अनुभावा भ्रुकुट्यक्षिरागोष्ठस्पन्दनादयः ॥ ४० ॥
स्वेदवैवर्ण्यवैस्वर्यप्रमुखाः सात्त्विकाः स्मृताः ।

ईर्ष्यामर्षोग्रतागर्वमदाद्या व्यभिचारिणः ॥ ४१ ॥

वीररसः—

उत्साहस्तु विभावाद्यैः पुष्टो वीररसो भवेत् ।
दानवीरो दयावीरो युद्धवीरस्त्रिधा यथा ॥ ४२ ॥

"दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सा च वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाद्भुतमिदं [1]यत्रैव चास्तं गतम् ॥"

"सिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवैव तावत्किं भक्षणात् त्वं विरतो गरुत्मन् ॥"

"क्षुद्राः संत्रासमेनं विजहित हरयो भिन्नशक्रेभकुम्भा
युष्मद्गात्रेषु लज्जां दधति परममी सायकाः संपतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमपि न हि रुषो नन्वहं मेघनादः
किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥"

आद्ये सत्पात्रमालम्बो द्वितीये दीन उच्यते ।
वैरी तृतीये विज्ञेयस्तत्र तूद्दीपकाः[2] क्रमात् ॥ ४३ ॥
दानस्तुतिर्दीनवाक्यं रणभेरीस्वनादयः ।
अनुभावाः क्रमादास्यप्रसादाश्ववस्त्रसंग्रहाः ॥ ४४ ॥
अत्र ज्ञेया यथायोगं सात्त्विकाः पुलकादयः ।
संचारिणो गर्वहर्षामर्षधृत्यादयोऽपि च ॥ ४५ ॥

[1] तत्रैव P.

[2] उद्दीपनाः P.

भयानकरसः—

भयमेव विभावाद्यैर्भयानकरसो यथा ।

"नीलेन ते नीररुहाक्षि गात्रं चेलेन संछादय चञ्चलाभम् ।
इतीरयन्त्यद्रिगुहासु लीनास्त्वद्वैरिणो वीक्ष्य तमोविघातम् ॥"

आलम्बनविभावाः स्युः शत्रुव्याघ्रोरगादयः ॥ ४६ ॥
उद्दीपनविभावाः स्युस्तत्र तद्गर्जनादयः ।
अनुभावास्तु वैवर्ण्यकम्पस्वेदादयो मताः ॥ ४७ ॥
त एव सात्त्विका भावास्तत्राष्टौ स्पष्टलक्षणाः ।
संचारिणो मोहदैन्यत्राससंभ्रमणादयः ॥ ४८ ॥

बीभत्सरसः—

जुगुप्सैव विभावाद्यैर्याता बीभत्सतां द्विधा ।
[1]जुगुप्स्यदर्शनादेको वैराग्यादपरो यथा ॥ ४९ ॥

[2]वेङ्गक्षोणिभुजा पराक्रमयुजा निर्वासिता[3] वैरिणः
संविष्टाः प्रतिचत्वरं प्रतिमठं[4] ये नूत्नकापालिकाः ।
पूयार्द्रव्रणसंस्पृशो व्यपनयन्तः सत्वरं मक्षिका
भिक्षाभक्तविकीर्णशाकशकलान्येकत्र संचिन्वते ॥

"चारभटचोरचेटक[5]नटविटनिष्ठीवनशरावम् ।
कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ॥"

आलम्बनविभावाः स्युरहृद्या ये जुगुप्सिताः ।

[1] जुगुप्सा P.
[2] व्यङ्ग P, वेङ्गि A.
[3] निर्यासिताः A.
[4] प्रतिपदं A.
[5] विटनट P.

उद्दीपनविभावा ये पूतिगन्धादयो मताः ॥ ५० ॥
अत्रानुभावा नासास्यकूणनावेगपूर्वकाः ।
ऊह्यास्तत्र यथायोगं[1] सात्त्विकाः पुलकादयः ॥ ५१ ॥
संचारिणो यथायोगं[1] निर्वेदोद्वेजनादयः ।

अद्भुतरसः—

विस्मयस्तु विभावाद्यैः पुष्टोऽभूदद्भुतो यथा ॥ ५२ ॥

"सूतः सायकसंभवः समुदिताः सूताननेभ्यो हया
नेत्रे द्वे रथिनो रथाङ्गयुगलं युग्यान्तमृग्यो रथी ।
मौर्वीमूर्ध्नि रथः स्थितो रथवहश्चापः शरव्यं त्रयं
योद्धुः केशचरं तदेतदखिलत्राणं रणं पातु वः[2] ॥"

अलौकिकचमत्कारि वस्त्वालम्बनमिष्यते ।
उद्दीपनविभावाः स्युरहोवादादिवर्णनाः ॥ ५३ ॥
अनुभावा नेत्रवक्त्रगण्डविस्फुरणादयः ।
सात्त्विकाः स्वेदरोमाञ्चप्रमुखाः परिकीर्तिताः ॥ ५४ ॥
हर्षोद्वेगादयो भावाश्चात्र संचारिणो मताः ।

शान्तरसः—

शम एव विभावाद्यैः पुष्टः शान्तरसो यथा ॥ ५५ ॥

"आशायाः प्रशमय्य वेगमखिलं निर्णीय विश्वं जडं
नीत्वा शान्तिपथं[3] शनैस्तत इतो डोलायमानं मनः ।
कृत्वा चेतसि केवलं पशुपतेरैश्वर्यमव्याहतं
कोणे कुत्रचिदास्महे वयममी कोलाहलैः किं फलम् ॥"

[1] यथायोग्यं P. [2] नः A. [3] पदं P. U.

अत्रालम्बनविभावः स्याच्छंभोस्तच्छाश्वतं पदम् ।
उद्दीपकास्तु[1] वेदान्तवेदिसंभाषणादयः ॥ ५६ ॥
अनुभावास्तु कथ्यन्ते समदर्शनतादयः ।
सात्त्विकाः स्तम्भरोमाञ्चप्रमुखाः परिकीर्तिताः ॥ ५७ ॥
संचारिणोऽपि निर्वेदमतिधृत्यादयो मताः ।

रसानां वर्णा देवताश्च—

शृङ्गार उत्पलाभः स्याद्विष्णुरस्याधिदेवता ॥ ५८ ॥
हास्यः सुधाशुभ्रवर्णो हेरम्बोऽस्याधिदेवता ।
कषायवर्णः करुणो यमस्तस्याधिदेवता ॥ ५९ ॥
रौद्रो जपारक्तवर्णो रुद्रस्तस्याधिदेवता ।
वीरो रसो गौरवर्णः शक्रस्तस्याधिदेवता ॥ ६० ॥
धूम्रो भयानकस्तस्य महाकालोऽधिदेवता ।
बीभत्सो नीलमेघाभो नन्दी तस्याधिदेवता ॥ ६१ ॥
अद्भुतः कनकच्छायो ब्रह्मा तस्याधिदेवता ।
शान्तः स्फटिकवर्णोऽस्य परं ब्रह्माधिदेवता ॥ ६२ ॥

रसाद्रसान्तरोत्पत्तिः—

हास्यः शृङ्गारसंभूतः करुणो रौद्रसंभवः ।
वीराद‌द्भुत उत्पन्नो बीभत्सोत्थो भयानकः ॥ ६३ ॥

मिथो वैरिणो रसाः—

शृङ्गारबीभत्सरसौ तथा वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ।

[1] उद्दीपनास्तु P.

शान्तः सर्वोत्तरस्तस्य न मैत्री न विरोधिता ॥ ६४ ॥

रसभावोचितवर्णैः कर्णामृतवाक्यकल्पितैः श्लोकैः ।

लोकैरपि [1]लालयगुणो [2]मानिन्निरुत्तुगण्डमन्ननृप ॥ ६५ ॥

इति श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे[3]
रसनिर्णयो नाम तृतीयः परिच्छेदः ।

---

[1] विदितगुण: G. 1.

[2] मानिनीचित्तमुण्मन्मनृप P.

[3] सर्वालंकारसंग्रहे A. U.

चतुर्थः परिच्छेदः

नेतृसामान्यगुणाः—

विनयो दक्षता त्यागो माधुर्यं प्रियवादिता ।
जनानुरागो वाग्मित्वं शौचं बुद्धिः कुलीनता ॥ १ ॥
[1]धैर्यं स्मृतिस्तथोत्साहो यौवनं मान एव च ।
शौर्यं दृढत्वं तेजश्च धर्मशास्त्रार्थकारिता ॥ २ ॥
प्रज्ञा कलावेदिता च नेतृसाधारणा गुणाः ।

चतुर्विधा नायकाः—

एवंविधगुणोपेतो नायकः स चतुर्विधः ॥ ३ ॥
धीरोदात्तोऽथ ललितो धीरशान्तोद्धताविति[2] ।

धीरोदात्तः—

क्षमावानतिगम्भीरो महासत्त्वोऽविकत्थनः ॥ ४ ॥
कृपालुरनहंकारी धीरोदात्तो मतो यथा ।

"दधतो मङ्गलक्षौमे [3]वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥"

[1] स्थैर्यं P. [2] वपि P. U. [3] दधानस्य P.

“गृहीतं येनासीः परपरिभवभयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमपि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते ॥”

विमोक्ष्येऽहमपीत्यत्र न हेतुः शस्त्रमोचने ॥ ६७ ॥

प्रसिद्धिविरुद्धः—

स प्रसिद्धिविरुद्धो यो लोकैरविदितो यथा ।

"इदं ते केनोक्तं कथय कमलातङ्कवदने
यदेतस्मिन् हेम्नः कटकमिति धत्से खलु धियम्[1] ।
इदं तद्दुःसाधं कलय परमास्त्रं स्मृतिभुवा
तव प्रीत्या चक्रं करकमलमूले विनिहितम् ॥"

चक्रं मनोभवस्यास्त्रमप्रसिद्धमिहोच्यते ॥ ६८ ॥

विद्याविरुद्धः—

विद्याविरुद्धः स्मृत्यादिविरोधात्कथितो यथा ।

"सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥"

उपरागं विना रात्रौ स्नानं तु स्मृतिगर्हितम् ॥ ६९ ॥

व्यर्थीकृतः—

व्यर्थीकृतो यच्छ्लाघ्यानां व्यर्थत्वापादनं यथा ।

"प्राप्ताः श्रियः सकलकामदुघास्ततः किं
न्यस्तं पदं शिरसि विद्विषतां ततः किम् ।
संतर्पिताः प्रणयिनो विभवैस्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ॥"

अत्र व्यर्थत्वमेवोक्तमर्थानां न प्रयोजनम् ॥ ७० ॥

सनियमः—

नियमोऽनुचितेऽर्थे यः स स्यात्सनियमो यथा ।

[1] धिया P.

"कटु रटति निकटवर्ती नाराटष्टिट्टिभः पटुर्यत्र[1] ।
अपसरणमेव शरणं मौनं वा राजहंसस्य ॥"

अत्रापसारणे युक्तो नियमो नैवकारतः[2] ॥ ७१ ॥
मौनं वेत्यन्यपक्षस्य संभवाद् दूषणं हि यत्[3] ।

अनियमः—

नियमे सति वक्तव्ये तत्त्यागोऽनियमो यथा ॥ ७२ ॥

"चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ।
हतान्येकेन रामेण मानुषेण पदातिना ॥"

एकेनैवेति वक्तव्ये नैवात्र नियमः कृतः ।

विशेषपरिवृत्तः—

वाच्ये विशेषे सामान्याद्विशेषव्यत्ययो यथा ॥ ७३ ॥

"श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकै-
र्मन्त्रं तन्त्रमथ प्रयुज्य हरत श्वेतोत्पलानां स्मितम्[4] ।
चन्द्रं चूर्णयत क्षणेन कणशः कृत्वा शिलापट्टके
येन द्रष्टुमहं क्षमे दश दिशस्तद्वक्त्रमुद्राङ्किताः ॥"

अत्र ज्योत्स्नीमिति[5] श्यामाविशेषोक्तिर्विशिष्यते ।

सामान्यपरिवृत्तः—

सामान्योक्तौ विशेषोक्तिः सामान्यव्यत्ययो यथा ॥ ७४ ॥

[1] वाचाटष्टिट्टिभो यत्र P; U; G. 3.
[2] नैव कार्यत: A 1; U.
[3] तत् A 1; P.
[4] श्रियम् P.
[5] ज्योत्स्नीति हि A.

“ कल्लोलवेल्लितदृषत्परुषप्रहारै
रत्नान्यमूनि मकराकर मावमंस्थाः ।
किं कौस्तुभेन भवतो विहितं न नाम
यत्र प्रसारितकरः पुरुषोत्तमोऽपि ॥ ”

रत्नसामान्यतो नाम सिन्धोरत्र न कौस्तुभात् ।

साकाङ्क्षः—

यत्र बाह्यार्थसापेक्षः साकाङ्क्षो गीयते यथा ॥ ७५ ॥

“ द्वारं द्वारमितो वृष्टिः शीतवातातिदुःसहा ।
दिशो नीरन्ध्रतिमिरनिगीर्णा इव निष्प्रभाः ॥ ”

आकाङ्क्षत्यत्र बाह्यार्थं त्वरयोद्घाट्यतामिति ।

उक्तविरुद्धः—

स स्यादुक्तविरुद्धोऽर्थो विरुद्धः स्वोक्तयोर्यथा ॥ ७६ ॥

“ न स्वर्गो नापि नरको धर्माधर्मौ न तत्फले ।
धन्योऽसि यस्त्वं सर्वस्वं ब्राह्मणेभ्यः प्रयच्छसि ॥ ”

परलोकाद्यभावोक्तेर्विरुद्धं दानकीर्तनम् ।

त्यक्तपुनःस्वीकृतः—

त्यक्तोऽपि पुनरुपात्तस्त्यक्तपुनःस्वीकृतो मतः स यथा ॥ ७७ ॥

“ अरे रामाहस्ताभरण भसलश्रेणिशरण
स्मरक्रीडाव्रीडाशमन विरहिप्राणदमन ।
सरोहंसोत्तंस प्रचलदल नीलोत्पल सखे
सखेदोऽहं मोहं श्लथय कथय क्वेन्दुवदना ॥ ”

विरहिदमनेति मुक्त्वा स्वीकुरुते सखिपदेन पुनरेव ।

अश्लीलः—

अश्लीलो मुख्यार्थादन्यो व्रीडाकरः स यथा[1] ॥ ७८ ॥

"हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।
[2]यदास्य जायते पातो न तदा[3] पुनरुन्नतिः ॥"

अत्र ध्वन्यो मुख्यादन्योऽर्थो जायते हि[4] लज्जायै ।

विध्यनुवादविवृत्तः—

विध्यनुवादविवृत्तो विध्यनुवादौ विवर्तितौ स यथा ॥ ७९ ॥

"प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवं भुवनमद्य निःसोमकम् ।
इयं परिसमाप्यते रणकथाद्य दोःशालिना-
मपैतु रिपुकाननातिगुरुरद्य भारो भुवः ॥"

शयितः परिबोध्यस इति वक्तव्यमिहानुवादविधियुगलम् ।

सहचरभिन्नः—

सहोत्कृष्टैर्निकृष्टोक्तिर्भिन्नः सहचरैर्यथा ॥ ८० ॥

"श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा ।
निशा शशाङ्केन धृतिः समाधिना नयेन चालंक्रियते नरेन्द्रता ॥"

उत्कृष्टेभ्यः श्रुतादिभ्यो भिन्ने व्यसनमूर्खते ।

[1] व्रीडाकरो मतः स यथा P.
[2] यथास्य A 1. यथा संजायते P.
[3] तथा A 1; P.
[4] मेहतिर्हि U. G 3.

दोषाणां गुणत्वम्—

दोषा एव गुणीभावं प्राप्नुवन्ति कचित्कचित् ॥ ८१ ॥

श्रुतिकटुनोऽदुष्टत्वम्—

"सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनताप्सीत्समरंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं व्यवधीदरींश्च ॥"

उदाहरणकाव्यत्वान्न[1] दुष्टं श्रुतिकट्वपि ।
प्रहेलिकाद्व्यर्थबन्धैकाक्षरद्व्यक्षरादिषु ॥ ८२ ॥
क्लिष्टासमर्थनेयार्थावाचकाद्या न दूषिताः ।

असमर्थनेयार्थयोरदुष्टत्वम्—

"देवराजो मया दृष्टो वारिवारणमस्तके ।
भक्षयित्वार्कपत्राणि विषं पीत्वा क्षयं गतः ॥"

वारिवारणशब्दोऽत्र नेयार्थोऽपि न दुष्यति ॥ ८३ ॥
असमर्थावपि विपक्षयौ स्वार्थे न दुष्यतः ।
अन्यदप्येवमेवोह्यमुदाहरणदर्शने ॥ ८४ ॥

क्लिष्टनिरर्थकयोरदुष्टत्वम्—

"बल्यरिक्रत्वरी पातां साम्बुव्यम्बुघनोपमौ ।
सदृशौ बककाकाभ्यां चवैतुहिचवैतुहि ॥"

बल्यरिक्रत्वरीत्यत्र क्लिष्टसंध्यप्यदूषणम् ।
निरर्थकमदुष्टं स्याद्वाक्ये छान्दसभाषिते ॥ ८५ ॥

[1] वाक्यत्वान्न P.

अश्लीलस्यादुष्टत्वम्—

" कण्डूतेरप्रतीकारादन्तर्लिङ्गाविमर्दनात् ।
न द्रवन्ति न तृप्यन्ति योषितो नीचमेहने ॥ "

अत्र व्रीडाश्लीलमपि कामतन्त्रे न दूषणम् ।

" उत्तानोच्छूनमण्डूकपाटितोदरसंनिभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः[1] कस्य जायते ॥ "

जुगुप्साश्लीलमप्यत्र विरक्तोक्तौ न दूषणम् ॥ ८६ ॥

संदिग्धस्यादुष्टत्वम्—

" पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम् ॥ "

संदिग्धमप्यदुष्टं स्याद्वक्तृबोद्धव्यभेदतः ।

अप्रतीतस्यादुष्टत्वम्—

" ग्रहैस्ततः पञ्चभिरुच्चसंस्थितैरसूर्यगैः सूचितभाग्यसंपदम् ।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम् ॥ "

अप्रतीतमपि ज्योतिः प्रसङ्गेऽत्र न दुष्यति ॥ ८७ ॥

न्यूनपदस्यादुष्टत्वम्—

" गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलत्काञ्चीनितम्बाम्बरा[2] ।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥ "

[1] अक्रिमेः A; G 3.

[2] प्रदेशाम्बरा A; G. 3.

मामेत्यादि न्यूनपदं पारवश्ये न दूषणम् ।

अधिकपदस्य गुणत्वम्—

" यद्वञ्चनाहितमतिर्बहुचाटुगर्भं
कार्योन्मुखः खलजनः कृतकं ब्रवीति ।
तत्साधवो न न विदन्ति विदन्ति किं तु
कर्तुं वृथा प्रणयमस्य न पारयन्ति ॥ "

गुणोऽन्ययोगव्यावृत्त्यै विदन्तीत्यधिकं पदम् ॥ ८८ ॥

पुनरुक्तस्य गुणत्वम् —

विषादे विस्मये हर्षे कोपे दैन्येऽवधारणे ।
प्रसादनेऽनुकम्पायां द्विस्त्रिरुक्तं न दुष्यति ॥ ८९ ॥

" म्रियतां म्रियतां तन्वी किं वा जीवितयानया ।
जीवितं सखि मानाय नैष चेज्जीवितेन किम् ॥ "

अस्मिन् विषण्णवचने पौनरुक्त्यं गुणो मतः ।

" अहो सत्त्वमहो धैर्यमहो दानमहो क्षमा ।
अहो शीलमहो पुण्यं हरिश्चन्द्रस्य[1] भूपतेः ॥ "

अहोपदानामत्रोक्तिर्बहुधा विस्मये गुणः ॥ ९० ॥

" सेयं मन्मथसर्वस्वं मन्मनोगृहदेवता ।
लावण्याम्भोधिलहरी दृश्यतां दृश्यतां सखे ॥ "

हृष्टस्य वाक्यभणितौ द्विरुक्तिरिह भूषणम् ।

[1] हरिचन्द्रस्य P; U.

"अस्तु नीराक्षसा पृथ्वी निःशल्यास्तु जगत्त्रयी ।
तिष्ठ तिष्ठ क्षणं संख्ये हन्मि त्वां दशकंधर ॥"

क्रुद्धस्य वचनेऽप्यत्र द्विरुक्तिर्नैव दुष्यति ॥ ९१ ॥

"देहि देहीति वदतो देहि देहीति यो वदेत् ।
देही देहान्तरं प्राप्य पुनर्देहीति नो वदेत् ॥"

दैन्येऽपि तद्वदेवात्र पुनरुक्तिर्न दूषणम् ।

"धन्विनां मृगवनेषु गच्छतां रूपकोटिकथनेऽधिका क्षतिः[1] ।
खिद्यते किमनिशं प्रयोजनादेकदा नरवधः[2] कृतः कृतः ॥"

अत्रावधारणे तद्वत्पुनरुक्तिर्न दुष्यति[3] ॥ ९२ ॥

"प्रसीद कोपमुन्मुञ्च प्रसीद कलभाषिणि ।
तव तन्वि पदोपान्ते लुठत्ययमयं प्रियः ॥"

उक्तस्यैवात्र कथनं गुण एव प्रसादने ।

"हन्यते सा वरारोहा स्मरेणाकाण्डवैरिणा ।
हन्यते चारुसर्वाङ्गी हन्यते मञ्जुभाषिणी ॥"

गुण एवानुकम्पायामत्रापि पुनरुक्तता ॥ ९३ ॥

गर्भितस्यादुष्टत्वम्—

"दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धौ चापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।

[1] अपि का क्षतिः P.
[2] वासरत्रधः U ; G. 3.
[3] दूषणम् U.

विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाद्भुतमिदं तत्रैव[1] चास्तं गतम् ॥"

अद्भुते गर्भितमपि वदन्तेत्याद्यदूषणम् ।

विरुद्धस्य गुणत्वम्—

"नेयं निशा दिवस एव भवेत्कथं मे
निद्रान्यथा नयनयोर्युगलं न याति ।
नायं शशी तपन एव तनोति ताप-
मुत्पात एव यदि मास्तु विभान्ति ताराः ॥"

दिवसत्वरवित्वोक्तिर्विरहे रात्रिचन्द्रयोः ॥ ९४ ॥
सा प्रत्यक्षविरुद्धापि गुणोऽत्र न तु दूषणम् ।

नेयार्थस्यादोषत्वम्—

"मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा ।
वाहिनीजलभरः कुलिशं वा स्वस्ति तेऽस्तु लतया सह वृक्ष ॥"

प्रसिद्धकारणैर्नेयो नाशयत्वित्यदूषणम् ॥ ९५ ॥

निर्हेतोर्गुणत्वम्—

"चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥"

दिवा न द्योतते चन्द्रः पद्मं नोज्जृम्भते निशि ।
प्रसिद्धत्वादिहानुक्तौ निर्हेतुकथनं गुणः ॥ ९६ ॥

[1] यत्रैव G. 3.

कविसमयसिद्धा विशेषाः—

हासस्य यशसः शौक्ल्यं लौहित्यं क्रोधरागयोः ।
ज्योत्स्नापानं चकोराणां कार्ष्ण्यं पापायशोदिवाम् ॥ ९७ ॥
चन्द्रचन्दनकर्पूरवनवाततटित्वताम्[1] ।
मुक्ताहारस्रगादीनां दाहकत्वं वियोगिषु ॥ ९८ ॥
वेधकत्वं कटाक्षस्य पानं रूपस्य दृष्टिभिः ।
इन्दीवरारविन्दादि सरिदर्णवयोरपि ॥ ९९ ॥
कुसुमभ्रमराः काण्डधनुर्ज्याश्च मनोभुवः ।
तच्छराणां मनो लक्ष्यं वसन्तः सुहृदिष्यते ॥ १०० ॥
एवमादि कृतं काव्येष्वसदेव प्रसिद्धिमत् ।
कर्णावतंसश्च शिरःशेखरः कर्णकुण्डलम् ॥ १०१ ॥
संनिधानादिबोधार्थमेषु कर्णादिकीर्तनम् ।
मुक्ताहारपदं त्वन्यरत्नयोगनिवृत्तये ॥ १०२ ॥
आरूढत्वप्रतीत्यर्थं धनुर्ज्यापदमुच्यते ।
पुष्पमालेति सुरभिपुष्पनिर्मितताधिये[2] ॥ १०३ ॥
कलभे करिशब्दोक्तिस्तन्मात्रत्वप्रतीतये ।
इत्यादिषु परिज्ञेयं स्थितेष्वेव समर्थनम् ॥ १०४ ॥

रसदोषाः—

आभासो रसभावानां स्वशब्दग्रहणं तथा ।
कष्टकल्पनया व्याप्तिरनुभावविभावयोः ॥ १०५ ॥
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः ।

[1] वादीतटित्वताम् U. [2] निर्मितसूक्तये P.

अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः[1] ॥ १०६ ॥
अङ्गिनोऽननुसंधानं प्रकृतीनां विपर्ययः ।
अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशः ॥ १०७ ॥

रसाभासः—

आभासत्वं रसस्य स्यादनौचित्याद् द्विधा यथा ।

"स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे
विलेभे कः प्राणान् रणमुखमखे यं मृगयसे ।
सुलग्ने को जातः शशिमुखि यमालिङ्गसि बलात्
तपःश्रीः कस्यैषा मदननगरि ध्यायसि तु यम् ॥"

अनेककामिविषयस्त्वभिलाषोऽत्र लक्ष्यते ॥ १०८ ॥

"दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतहस्तपल्लवा ।
शीतलेन निरवापयत् क्षणं मौलिचन्द्रशकलेन शूलिनः ॥"

पित्रोरिवात्र शिवयोर्नार्हं संभोगवर्णनम् ।

भावाभासः—

भावानामप्यनौचित्यादाभासत्वं मतं यथा ॥ १०९ ॥

"राकासुधाकरमुखी तरलायताक्षी
सस्मेरयौवनतरङ्गितविभ्रमाढ्या ।
तत्किं करोमि विदधे कथमत्र मैत्रीं
तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ॥"

[1] विस्मृतिः U.

अनिच्छन्त्यामिवामुत्र चिन्ता काचिद्विगर्हिता ।
रसभावान्तरेऽप्येवमाभासत्वमवेक्ष्यताम् ॥ ११० ॥

रसभावयोः स्वशब्दग्रहणे दोषः—

दोषा रसानां भावानां स्वशब्दग्रहणाद्यथा ।

रसस्य स्वशब्दग्रहणम्—

"आलोक्य कोमलकपोलतलाभिषिक्त-
व्यक्तानुरागसुभगामभिरामरूपाम् ।
पश्यैष चाल्पमभिसृत्य विवर्तमानः
शृङ्गारसीमनि तरङ्गितमातनोति ॥"

अत्र स्वशब्दग्रहणाच्छृङ्गारेति[1] विदुष्यति ॥ १११ ॥

भावस्य स्वशब्दग्रहणम्—

"सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि ।
सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे
पार्वत्या नवसंगमप्रणयिनी दृष्टिः शिवायास्तु वः ॥"

व्रीडादिभिः पदैर्दोषो ग्रहणं व्यभिचारिणाम् ।

"संप्रहारे प्रहरणैः प्रहाराणां परस्परम् ।
झणत्कारैः श्रुतिगतैरुत्साहस्तत्र कोऽप्यभूत् ॥"

उत्साहस्य स्थायिनोऽत्र दोषस्तच्छब्दकीर्तनम् ॥ ११२ ॥

[1] शृङ्गारेति हि दुष्यति A; G 1.

कष्टकल्पना—

“ परिहरति रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः ।
इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥ ”

रत्यादिपरिहारादेः करुणेऽपि च संभवात् ।
विप्रलम्भेऽनुभावानामत्र स्यात्कष्टकल्पना ॥ ११३ ॥

प्रतिकूलग्रहणम्—

“ प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।
निदानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ॥ ”

शान्तेऽनुभावः कालस्यानित्यत्वपरिकीर्तनम् ।
शृङ्गारे प्रतिकूलं तत्प्रतिकूलग्रहस्त्विह ॥ ११४ ॥
इत्यादिरसदोषाणां प्रबन्धविषयत्वतः ।
प्रबन्धेष्वेव लक्ष्याणि ज्ञेयानि रसकोविदैः ॥ ११५ ॥
सर्वदोषरहितं सगुणं यत्काव्यमव्ययशस्करमुर्व्याम् ।
त्वच्चरित्रमिव साधु निषेव्यं गर्वितारियम गण्डरगण्ड ॥ ११६ ॥

इति श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे[1]
दोषगुणनिर्णयो नाम षष्ठः परिच्छेदः

---

[1] सर्वालंकारसंग्रहे A.

सप्तमः परिच्छेदः

नाट्यप्रशंसा—

चतुर्वेदसमुद्भूतं साराभिनयभूषितम् ।
धर्म्यमर्थ्यं यशस्यं च नाट्यं को नाभिनन्दति ॥ १ ॥
न तच्छास्त्रं न सा विद्या न तच्छिल्पं न ताः कलाः ।
नासौ योगो न तज्ज्ञानं नाटके यन्न दृश्यते[1] ॥ २ ॥

रूपकम्—

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।
रूपकं [2]तत्समारोपाद्बहुधात्र रसाश्रयम् ॥ ३ ॥
वस्तुभेदान्नेतृभेदाद्रसभेदाच्च तद्विधा ।

इतिवृत्तम्—

इतिवृत्तं वस्तु चेति कथाया नाम तद् द्विधा ॥ ४ ॥

इतिवृत्तभेदाः—

तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः ।
प्रख्यातं मिश्रमुत्पाद्यमिति तत् त्रिविधं तथा[3] ॥ ५ ॥

[1] रस्यते G. 3; U.

[2] तत्समारोपादाहुः पात्रं रसाश्रयम् U.

[3] इति तद् द्विविधं त्रिधा A 1.

इतिहासादिषु ख्यातं प्रख्यातमिति कीर्तितम् ।
उत्पाद्यं कविक्लृप्तं स्यान्मिश्रं तद्द्वयसंकरात् ॥ ६ ॥

अर्थप्रकृतयः—

बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ।
अर्थप्रकृतयः पञ्च क्रमेण परिकीर्तिताः ॥ ७ ॥

बीजम्—

स्वल्पमेव समुद्दिष्टं पश्चाद्विस्तार्यनेकधा ।
हेतुः [1]कार्यस्य सिद्धौ यस्तद्बीजं बीजवद्यथा ॥ ८ ॥

"कुमुदिनीपरिभोगकृतागसं [2]मधुकरं नलिनीं मलयानिलः ।
नयति संप्रति नर्मसुहृज्जनः कलुषितां रमणीमिव कामुकम् ॥"

बिन्दुः—

अवान्तरार्थकथनाद्वस्तुविच्छेदसंभवे[3] ।
तस्याविच्छेदकथनं बिन्दुरित्युच्यते यथा ॥ ९ ॥

"कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि ।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥"

पताका—

प्रासङ्गिककथात्यर्थं या दूरमनुवर्तते ।
सा पताका समाख्याता सुग्रीवचरितं यथा ॥ १० ॥

पताकास्थानकम्—

भाविनः प्रस्तुतार्थस्य यदन्योक्त्यैव सूचनम् ।
पताकास्थानकं तुल्यसंविधानविशेषणम् ॥ ११ ॥

[1] कार्यप्रसिद्धौ यः U. [2] मधुकृतं A. [3] विच्छेदनं यतः A 1.

"यातोऽस्मि पद्मनयने समयो ममैष
सुप्ता मयैव भवती प्रतिबोधनीया ।
प्रत्यायनामयमितीव सरोरुहिण्याः
सूर्योऽस्तमस्तकनिविष्टकरः करोति ॥"

"उद्दामोत्कलिकां विपाण्डुररुचिं प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः ।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन्कोपविपाटलच्छवि मुखं देव्याः करिष्याम्यहम् ॥"

[1]आद्यं तुल्यात्संविधानाद् द्वितीयं तद्विशेषणात् ।

प्रकरी—

प्रासङ्गिककथैवैकदेशसंबन्धकीर्तिता ॥ १२ ॥
प्रकरी नाम सा ज्ञेया जटायुचरितं यथा ।

कार्यम्—

कार्यं फलं त्रिवर्गं स्यादेकानेकानुबन्धवत् ॥ १३ ॥

कार्यावस्थाः—

आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ।

आरम्भः—

औत्सुक्यमात्रमारम्भः फललाभाय तद्यथा ॥ १४ ॥

"आरम्भेऽस्मिन्स्वामिनो वृद्धिहेतौ दैवेनेत्थं दत्तहस्तावलम्बे ।
सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि स्वेच्छाचारी भीत एवास्मि भर्तुः ॥"

[1] एकं A 1.

यत्नः—

तदलाभे प्रयत्नः स्याद्व्यापारस्त्वरया यथा ।

“ राजा—वयस्य, एक एव मालवेश्वरोऽस्माभिरभियातव्यः । तदुद्धरणाय त्वरिततरं प्रयतामहे ।”

प्राप्त्याशा—

उपायापायशङ्काभ्यां प्राप्त्याशा संभवो यथा ॥ १५ ॥

“ राजा—

मन्त्रिनिरुद्धप्रसराऽप्यस्मत्कार्यानुरोधेन ।
[1]भिन्नबदरीव संप्रति समागमाशा प्रवर्तते शतधा ॥”

नियताप्तिः—

अपायाभावतः प्राप्तिर्नियताप्तिर्मता यथा ।

“ नवमालिका—अय्य, एव्वं ण मंतव्वं । णिरवाअं साअरलंघणं उवाअदो संपादिदं । इदो वरं मम पिअसही तुह अंकगदेव्व मंतव्वा ।”

(आर्य, एवं न मन्तव्यम् । निरपायं सागरलङ्घनमुपायतः संपादितम् । इतः परं मम प्रियसखी तवाङ्कगतैव मन्तव्या ।)

फलागमः—

समग्रफलसंपत्तिः फलयोगो मतो यथा ॥ १६ ॥

पुरोधाः—

“ कलितानि पदानि सप्त साक्षिण्यनले वामुभयोरतोऽस्तु सख्यम् ।
शिवयोरिव शाश्वतैकरस्यं भवतोर्यावदशीतशीतभानू ॥ ”

[1] भिन्नकबरीव A 1.

आरम्भादिभिरेताभिरवस्थाभिः समन्वितम् ।
मुखादिसंधिरूपेण जातं बीजादिपञ्चकम् ॥ १७ ॥

संधिः—

अवान्तरार्थसंबन्धः संधिरेकान्वये सति ।

पञ्च संधयः—

मुखं प्रतिमुखं चैव गर्भश्च तदनन्तरम् ॥ १८ ॥
विमर्शोऽन्ते निर्वहणमित्यमी पञ्च संधयः ।

मुखम्—

मुखं बीजसमुत्पत्तिर्नानार्थरससंभवा ॥ १९ ॥

मुखसंध्यङ्गानि—

अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ।
उपक्षेपः परिकरः परिन्यासो विलोभनम् ॥ २० ॥
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ।
उद्भेदभेदकरणान्यन्वर्थान्यथ लक्षणम् ॥ २१ ॥

उपक्षेपः—

उपक्षेपस्तु बीजेन वस्तुनो योजनं यथा ।

राजा—

"कुत्र सा कुवलयेक्षणा मया वीक्षितोपवनभूविहारिणी ।
शम्बरारिशरदेवतेव मे मानसं [1]तुदति मत्तकाशिनी ॥"
वयस्य, किं तत्र व्रजामः ?

[1] तपति U.

परिकरः—

बहुलीकरणं तस्य युक्त्या परिकरो यथा ॥ २२ ॥

“सौरभः—वयस्य, न केवलं त्वदीयमेव हृदयं समाकर्षति। अपितु,

अव्याजमुग्धमधुरैररविन्दकोण-
निर्यन्मधुव्रतनिकायनिभैः कटाक्षैः।
भावावतारपिशुनैरयि भो वयस्य
बाला भवन्तमकरोदपदेशलक्ष्यम् ॥”

परिन्यासः—

परिन्यासस्तु कार्यस्य निष्पन्नप्रायता यथा।

“कैरवः—वयस्य, यदि मामुद्दिश्य प्रेषयति, तर्हि,

मदनस्य मया राज्यं प्राज्यं बलवता हृतम्।
पुण्यैः पुरातनैरद्य प्रायेण फलितं मम ॥”

विलोभनम्—

विलोभनं च तत्प्रोक्तं मानसोल्लासकृद्यथा ॥ २३ ॥

“कैरवः—वयस्य, कोपे तु नैवम्। यतः,

बालातपक्रान्तपयोजपत्रमित्रे तु नेत्रे मिषतो न भीमे।
आकर्णकृष्टाङ्गजचापयष्टिभुग्ने भ्रुवौ न भ्रुकुटिस्तयोस्तु ॥”

युक्तिः—

संप्रधारणमर्थानां युक्तिरित्युच्यते यथा।

"बन्दी—देव, सत्यमेतत् ।

नृत्ताचार्यो मम सुहृदभूत्तत्र[1] कंदर्पदास-
स्तेनावश्यं पितुरभिनवं नृत्तमादर्शयेति ।
बद्ध्वा पत्रं सलिपि नगरद्वारि तेनानुशिष्ट-
स्तुष्टेनाहं दुहितृभवने चित्रकृत्येऽलिखं त्वाम् ॥"

प्राप्तिः—

या चित्तस्य सुखप्राप्तिः सा प्राप्तिर्गीयते यथा ॥ २४ ॥

"राजा—(स्वगतम्)

[2]आलोच्य वाक्यं स्वयमन्तरात्मा हृष्टः परानन्दमिव प्रविष्टः ।
प्रायेण भावीनि भवन्ति वस्तून्यालोच्यमानानि मनोहराणि ॥"

समाधानम्—

बीजागमः समाधानमिति संकीर्त्यते यथा ।

"राजा—(अपवार्य) वयस्य, वयं निलीना एव निवसामः ।

अनुरागमङ्गनाया मुखेन यः श्रोत्रपेयमाधुर्यम् ।
आकर्णयत्यजस्रं स एव मदनस्य शास्ति[3] साम्राज्यम् ॥"

विधानम्—

सुखदुःखकरं यत्स्याद्विधानं तद्विदुर्यथा ॥ २५ ॥

"कैरवः—वयस्य, पुरस्तादवलोकय तस्यास्ताम्बूलकरङ्कवाहिनीम्;

[1] दत्र G 3.

[2] आलोक्य U ; G 3.

[3] U omits शास्ति.

आज्ञेव शम्बररिपोरविलङ्घनीया
वाञ्छेव विग्रहवती वशगा दृशोर्मे ।
अन्यार्थमेव किमुतापणमभ्युपैति
संदेशमानयति सा किमु सारसाक्ष्याः ॥

अतो मनसि मे मोदखेदौ[1] वर्तेते ।"

परिभावना—

अद्भुतापादनं यत्स्यात्परिभावो मतो यथा ।

"कैरवः—वयस्य पश्य ;

रागोत्थिता रतिपतेरिव राज्यलक्ष्मी-
र्नारीललाम नयनोत्करपूर्वपुण्यम् ।
आलिङ्गितुं मलयमारुतमञ्जसासौ
वाञ्छत्यहो सुभगतास्य तु वागतीता ॥"

उद्भेदः—

गूढार्थभेदनं यत्स्यादुद्भेदः प्रोच्यते यथा ॥ २६ ॥

"विदूषकः—वअस्स, विसुमरिदं तुए । जं ताए एव्व अहं पि सरिसं एव्व पेक्खामित्ति भणिदं ।

(वयस्य, विस्मृतं त्वया। यत्तयैवाहमपि सदृशमेव पश्यामीति भणितम्।)

राजा—सखे तदिदानीं संस्मृतम् ।"

भेदः—

प्रारब्धकार्यसिध्यर्थं भेदः प्रोत्साहना यथा ।

[1] मोदजडौ A 1.

"सौरभः—कलिके, त्वमग्रतो गच्छ; मार्गं दर्शय।"

करणम्—

उद्दिष्टार्थस्य सिध्यर्थं प्रारम्भः करणं यथा ॥ २७ ॥

"राजा—शुद्धपार्ष्णिना हि जेतव्या रिपवः। ततो गौडेशमुन्मूल्य [1]मालवेशमभियास्यामः।

बन्दी—देव,

अकृते तु घनावरोधभेदे सति सायंतनमारुतेन ते न।
अवलोकयितुं सुखेन शक्या शशिरेखा शमिताखिलाभितापा ॥"

मुखे आवश्यकान्यङ्गानि—

उपक्षेपः परिकरः परिन्यासस्तथैव च।
युक्त्युद्भेदौ समाधानं मुखे वाच्यान्यवश्यतः ॥ २८ ॥

प्रतिमुखम्—

लक्ष्यालक्ष्य इवोद्भेदस्तस्य प्रतिमुखं भवेत्।

प्रतिमुखसंध्यङ्गानि—

बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश ॥ २९ ॥
विलासः परिसर्पश्च विधूतं शमनर्मणी।
नर्मद्युतिः प्रगमनं निरोधः पर्युपासनम् ॥ ३० ॥
पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि।

[1] मागधदेशं G 3; U.

विलासः—

रत्युद्देशेन याकाङ्क्षा विलासः स मतो यथा ॥ ३१ ॥

"राजा—(विहस्य) वयस्य,

विदितरसो विभवयुतो युवा यदि स्यात्सचेतनः सदृशीम् ।
कः खलु कामयमानां कान्तामप्राप्य कातरो न भवेत् ॥"

परिसर्पः—

दृष्टनष्टानुसर्पः स्यात्परिसर्पो मतो यथा ।

"राजा—(ससंभ्रमम्) वयस्य, त्वद्वचनचातुरीविस्मृतविषयान्तरो [1]गम्यमानमपि पन्थानं न गणयामि । क्वासौ नगरी?
(इत्युपसर्पति)"

विधूतम्—

अरतिर्मनसो या स्याद्विधूतं कथ्यते यथा ॥ ३२ ॥

"राजा—(निर्वर्ण्य सानन्दम्) वयस्य, समाकर्णय ।
दूराद्दर्शनवाञ्छा सविधगतायां समागमोत्कण्ठा ।
अप्राप्तायामधुना कथमिव मनसो रतिस्तस्याम् ॥"

शमः—

तस्यास्तु शान्तिररतेः शम इत्युच्यते यथा ।

"राजा—(निर्वर्ण्य सानन्दम्) वयस्य, मम हि;
दृढविरहविदाहमेष दृष्टो हरति चरो दयितासखीसमेतः ।
शशधर इव चन्द्रिकासनाथो निशि जगतो नितरां निदाघतापम् ॥"

[1] अवगम्यमानमपि U.

नर्म —

परिहासकृतं वाक्यं कथ्यते नर्म तद्यथा ॥ ३३ ॥

" विदूषकः—वअस्स. इह एव्व रमणिज्जा उवट्ठिदा तुह पिआ होदु ।

(वयस्य, इहैव रमणीयोपस्थिता तव प्रिया भवतु ।)

" राजा—(विहस्य) वयस्य, अधमवृत्तिफलमवलम्बसे ।"

नर्मद्युतिः—

द्युतिर्नर्मसमुद्भूता नर्मद्युतिरसौ यथा ।

" कः खलु धीरोदारां गभीरसलिलां पिपासुरपि गङ्गाम् ।
दूरादपि नासीदेदारादपि सारिणीं समुल्लङ्घ्य ॥"

प्रगमनम् —

उत्तरादुत्तरं वाक्यं प्रगमः कथ्यते यथा ॥ ३४ ॥

" मङ्गलवती—

वत्से वारं वारं वचनानि मयाद्य वर्णितानि तव ।
विगलन्ति कर्णविवराद्भग्नाद्भाण्डादिवाशु सलिलानि ॥

कौमुदी—

[1]माए मह प्परूडो दुव्वारदमो ण होदि किं मअणो ।
पज्जलदि किं ण पुण्णो अग्गिज्जालेव्व विअणपवणेहिं ॥

(मातर्मम प्ररूढो दुर्वारतमो न भवति किं मदनः ।
प्रज्वलति किं न पूर्णोऽग्निज्वाल एव व्यजनपवनैः ॥)

[1] The original MSS. read this passage thus:

माए मह प्पणिबो वारिदिदमो ण होदि किं मअणो ।
पज्जलदि ण पुण्णो अग्घिविज्जाइ विअणपवणेहिं ॥

निरोधनम्—

निरोधनं हितार्थस्य निरोधः कथ्यते यथा ।

"राजा—धिङ् मूर्ख,

प्राप्ता कथमपि दैवात्कण्ठमनीतैव सा प्रकटरागा ।

रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता ॥"

पर्युपासनम्—

पर्युपासनमुक्तं स्यात्क्रुद्धस्यानुनयो यथा ॥ ३५ ॥

"अपराधमिमं क्षमस्व सख्याश्चरणौ ते मदपेक्षया गृहाण ।

अरुणप्रभयावलीढपद्मां नलिनीं ह्याशु नयेद्धिकासमर्कः ॥"

पुष्पम्—

उक्ताद्विशेषवद्वाक्यं पुष्पं संकीर्त्यते यथा ।

"विदूषकः—भो वअस्स, सव्वधा एसो मुत्ताहारो जवकालजोग्गा अक्खमाला होदु ।

(भो वयस्य, सर्वथा एष मुक्ताहारो जपकालयोग्या अक्षमाला भवतु ।)

राजा—वयस्य, सत्यमेतत् । अन्यच्च,

आसित्वा विजने विमुक्तविषयासङ्गं मनो निश्चलं

कृत्वा हृज्जलजान्तरे प्रियतमारूपं परं दैवतम् ।

ध्यात्वा हारलतामयाक्षवलयं हस्तेन धृत्वा मया

तत्सायुज्यफलाप्तये प्रतिदिनं तन्नाम संजप्यते ॥"

वज्रम्—

प्रत्यक्षनिष्ठुरं वाक्यं वज्रमित्युच्यते यथा ॥ ३६ ॥

14

“ विदूषकः—भो वअस्स, अह्माणं एदं खु दुक्करं ।

(भो वयस्य, अस्माकमिदं खलु दुष्करम्)

राजा—आः, अत्यन्तनिष्ठुरमेतद्वाक्यम् ।

विषमिव मनसो मोहनमशनिरिव नितान्तनिष्ठुरं श्रवसोः ।

प्राणप्रयाणभेरीभाङ्कारः प्रणयजलधिबडवाग्निः ॥ ”

उपन्यासः—

उपन्यासः प्रसादोक्तिरुपायेनोच्यते यथा ।

“ मङ्गलवती—

सर्वथेयं समासक्ता तस्मिंस्तामरसेक्षणे ।

भव प्रसन्ना भद्रे त्वं तेन रोषो न ते वरम् ॥ ”

वर्णसंहरणम्—

चातुर्वर्ण्योपगमनं वर्णसंहरणं यथा ॥ ३७ ॥

“ कौमुदी—एदं ण सुदं तुए ?

सव्वाणं सहि वण्णाणं बम्हणो पढमो गुरू ।

आराहणिज्जो अण्णेहिं वण्णेहिं जेण वण्णिदो ॥

(एतन्न श्रुतं त्वया ?

सर्वेषां सखि वर्णानां ब्राह्मणः प्रथमो गुरुः ।

आराधनीयोऽन्यैर्वर्णैर्येन वर्णितः ॥) ”

प्रतिमुखे आवश्यकान्यङ्गानि—

प्रगमः परिसर्पश्चोपन्यासो वज्रमेव च ।

पुष्पं च नियमाद्वाच्यान्यन्यानि तु यथारुचि ॥ ३८ ॥

गर्भसंधिः—

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः ।
भवेन्न तु पताकात्र प्राप्त्याशा नियमाद्भवेत् ॥ ३९ ॥

गर्भसंध्यङ्गानि—

अभूताहरणं मार्गो रूपोदाहरणे क्रमः ।
संग्रहश्चानुमानं च तोटकाधिबले तथा ॥ ४० ॥
उद्वेगसंभ्रमाक्षेपा अङ्गानि द्वादशास्य तु ।

अभूताहरणम्—

छद्मकर्म समाख्यातमभूताहरणं यथा ॥ ४१ ॥

"सौरभः—आर्ये, किमुच्यते? छद्मनानुप्रविश्यसाधयामोऽभिलषितम् ।"

मार्गः—

तत्त्वार्थकथनं यत्तन्मार्ग इत्युच्यते यथा ।

"मङ्गलवती—ननु सौरभ,

कपटमिव कायवन्तं क इव विटच्छद्मना खलामेनाम् ।
अलमतिसंधातुमतस्तत्त्वं कथयामि तावतोऽर्थस्य ॥"

रूपम्—

सवितर्कं तु यद्वाक्यं रूपं तत्कथ्यते यथा ॥ ४२ ॥

"राजा—वयस्य,

नेयं निशा दिवस एव भवेत्कथं मे
निद्रान्यथा नयनयोर्युगलं न याति ।

नायं शशी तपन एव तनोति ताप-
मुत्पात एव यदि मास्तु विभान्ति ताराः ॥"

उदाहरणम्—

यदुत्कर्षकरं वाक्यं तदुदाहरणं यथा ।

"राजा—(मलयमारुतमुद्दिश्य)

मन्दोऽसि मलयमारुत कथमिव निश्वासमारुतैस्तस्याः ।
स्पर्धां करोषि मे त्वं विषायसे तेऽधुना सुधायन्ते ॥"

क्रमः—

क्रमः संचिन्त्यमानाप्तिर्ज्ञानं भावस्य वा यथा ॥ ४३ ॥

"राजा—(इति वदन्नेव नेत्रे निमीलयति)

विदूषकः—णोमालिए, एसो वअस्सो णिमीलिअणअणो संकप्पसमाअमसुहं अणुहोदि ।

(नवमालिके, एष वयस्यो निमीलितनयनः संकल्पसमागमसुखमनुभवति ।)"

संग्रहः—

सामोक्तेरभिधानं च संग्रहः कथ्यते यथा ।

"सौरभः—

अर्थैरनेकैर्जननीममुष्याश्चित्तं च दत्त्वा चिरकालमृग्यम्[1] ।
संतोषयेयं सहसैव भद्रे न चेत्कथं स्यादिह नः प्रवेशः ॥"

[1] चिन्त्यम् A 3; S.

अनुमानम् —

लिङ्गाल्लिङ्गिपरिज्ञानमनुमानं मतं यथा[1] ॥ ४४ ॥

" मङ्गलवती—

कारणं ज्ञायते कार्याद्धूमाद्धूमध्वजो यथा ।
अस्ति चेदर्थसंपत्तिरचिरादवलोक्यते ॥"

तोटकम् —

ससंरम्भं तु यद्वाक्यं तोटकं कथ्यते यथा ।

" मकरँदंष्ट्रा—(ससंभ्रमम्) जुत्तं पि सच्चं भणसि । जुज्जदि खु,
चोरो मज्झ करादो हारलदं हंत संभमेण हरंतो ।
पहरइ पासाणेहिं पेच्छसि तुमं पि किमेत्थ पडिकादव्वं ॥"
(युक्तमपि सत्यं भणसि । युज्यते खलु,
चोरो मम करात् हारलतां हन्त संभ्रमेण हरन् ।
प्रहरति पाषाणैः पश्यसि त्वमपि किमत्र प्रतिकर्तव्यम् ॥)"

अधिबलम् —

कार्यं यत्स्यातिसंधानं कथ्यतेऽधिबलं यथा ॥ ४५ ॥

" सौरभः—(स्वगतम्) अस्तु नाम । तथाप्यच्युतदत्तपदार्थबलादेवैनामतिसंधाय साधयामि कार्यम् ।"

उद्वेगः—

शत्रुभिर्या कृता भीतिरुद्वेगः कथ्यते यथा ।

[1] अनुमानं तु तद्यथा U; G 3; S.

"मकरदंष्ट्रा—ता राअउत्तस्स पुण्णमुत्तिणो किअमाणदुवेसे दुवेवि दुब्बह्मणे दाणिं एव्व मारेमि ।

(तत् राजपुत्रस्य पुण्यमूर्तेः क्रियमाणद्वेषौ द्वावपि दुर्ब्राह्मणाविदानीमेव मारयामि ।)"

संभ्रमः—

शङ्कात्रासौ यत्र वाक्ये संभ्रमः कथ्यते यथा ॥ ४६ ॥

"सौरभः—(सशङ्कं सत्रासं च स्वगतम्) किमेषा पूर्ववदेव कारयिष्यति ?"

आक्षेपः—

गर्भबीजसमुत्क्षेपादाक्षेपः कथितो यथा ।

"सौरभः—

प्रसादं तव संप्राप्य साधनीयं समीहितम् ।
विभावरीं विना सेव्या चकोरेण न चन्द्रिका ॥"

गर्भे आवश्यकान्यङ्गानि—

अभूताहरणं मार्गस्तोटकाधिबले अपि ॥ ४७ ॥
आक्षेपश्चात्र नियमाद्वाच्यान्यन्यान्यपीच्छया ।

अवमर्शसंधिः—

क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात् ॥ ४८ ॥
गर्भनिर्भिन्नबीजार्थं सोऽवमर्शोऽवमर्शनात् ।

अवमर्शसंध्यङ्गानि—

'अत्रापवादसंफेटौ विद्रवद्रवशक्तयः ॥ ४९ ॥
द्युतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम् ।
प्ररोचना विचलनमादानं च त्रयोदश ॥ ५० ॥

अपवादः—

दोषप्रख्यापनं यत्स्यादपवादो मतो यथा ।

" कैरवः—

पापे पुरा पातयितुं प्रवृत्ता संतानकं स्वल्पफलाय तर्हि ।
यागैरनेकैर्यमिभिर्वरेण्यो लोकः कथं लोचनगोचरस्ते ॥"

संफेटः—

रोषेण भाषणं यत्स्यात्संफेटोऽभिमतो यथा ॥ ५१ ॥

" मकरदंष्ट्रा—

पत्ता सुधा वारविलासिणीए माआभुअंगेण न मारिदेत्ति ।
सा केदई कामिअफुल्लपुप्फा कत्ता पुरा कंडइणी विसेण ॥
(प्राप्ता सुधा वारविलासिन्या मायाभुजङ्गेन न मारितेति ।
सा केतकी कामितफुल्लपुष्पा क्लृप्ता पुरा कण्टकिनी विषेण ॥)
कैरवः—धूर्ते, नाद्यापि रोषं मुञ्चसि ।"

विद्रवः—

वधबन्धादिकथनं विद्रवः कथ्यते यथा ।

[1] तत्र U.

"कैरवः —

बद्धः पश्चाद्धलिभिरवनीपालभृत्यैर्नियोगा-
द्यस्याः क्रूरैर्यमपरिसरं प्रापणीयो यथासम् ।
सा त्वं रोषं मयि वितनुषे सांप्रतं सांप्रतं ते
सर्पिः क्षीरं विषमिव खले साधयेत्साधु तेन ॥"

द्रवः—

द्रवो गुरुतिरस्कारकथनं कथ्यते यथा ॥ ५२ ॥

"लवः—

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते[1]
सुन्दस्त्रीदमनेऽप्यकुण्ठयशसो लोके महान्तो हि ते ।
यानि त्रीण्यकुतोमुखान्यपि पदान्यासन्खरायोधने
यद्वा कौशलमिन्द्रसूनुहनने[2] तत्राप्यभिज्ञो जनः ॥"

शक्तिः—

शक्तिः संकीर्त्यते सा यद्विरोधशमनं यथा ।

"राजा—वयस्य,

विसृज मनसि रोषं मा विरुद्धं वचो मे
तव भवतु निजानामेव कोपप्रसादौ ।
खरतररविरश्मिव्रातपातेऽपि सद्यः
सरसिजनिकुरुम्बं स्वैरमुन्मेषमेति ॥"

[1] वर्तते इत्यव्ययं दोषसंवरणार्थे इति नारायणीयव्याख्या । तेष्वपि वृद्धेषु संवरणीयो दोषगणो वर्तत एवेति शब्दार्थः ।

[2] निधने U ; S.

द्युतिः—

तर्जनोद्वेजने यत्र सा द्युतिः कीर्त्यते यथा ॥ ५३ ॥

"कैरवः—

या त्वं दूती यमस्येव तदा तर्जितवत्यपि ।
सैव संप्रति सोद्वेगा चपले चाटु[1] भाषसे ॥"

प्रसङ्गः—

कीर्तनं गुरुनाम्नो यत्प्रसङ्गः कथ्यते यथा ।

"मकरदंष्ट्रा—

जादो जलधिझरादो कासारादो विणिक्कन्तं ।
सुमरदि णागो हिअए किं पंकालित्तकासरं जादु[2] ॥

(जातो जलधिझरात् कासाराद्विनिष्क्रान्तम् ।
स्मरति नागो हृदये किं पङ्कालिप्तकासरं जातु ॥)"

छलनम्—

यत्रावमाननं वाक्ये छलनं तन्मतं यथा ॥ ५४ ॥

"बन्दी—देव,

कोऽयं ते प्रतिकर्तुमत्र भवतश्चेलान्तबद्धाक्षतो
भूयः स्वस्ति वदन्नटत्यनुगृहं दूर्वार्पणार्ताङ्गुलिः ।
किं कर्नाटमहीपतिः किमु महाराष्ट्रः किमङ्गाधिपः
किं पाण्ड्यः किमु घुर्जरः किममुना सर्वेऽपि ते सेवकाः ॥"

[1] चाटु G 3.

[2] उद्गीतिरियम्.

व्यवसायः—

स्वसामर्थ्यस्य कथनं व्यवसायो मतो यथा ।

" कैरवः—

जडं जलनिधेर्वारि मुक्त्वा मुनिर्निराकृतम् ।
मम स्वान्ते मधुध्वंसी नित्यं शेते निरामये ॥
अतोऽखिलजगत्स्वहमेवातुलप्रभावः ।"

विरोधनम्—

विरोधनं स्वशक्त्युक्तिः संरब्धानां मतं यथा ॥ ५५ ॥

" अर्जुनः—अर्य, प्रसीद । किमत्र क्रोधेन ?
अप्रियाणि करोत्येष वाचा शक्तो न कर्मणा ।
हतभ्रातृशतो दुःखी प्रलापैरत्र[1] का व्यथा ॥

भीमः—अरे, भरतकुलेन्दुकलङ्क,

अद्यैव किं न विसृजेयमहं भवन्तं
दुःशासनानुगमनाय बहुप्रलापिन् ।
विघ्नं गुरू न कुरुतो यदि मद्गदाग्र-
निर्भिद्यमानरणितास्थनि ते शरीरे ॥

अन्यच्च रे मूढ,

शोकं स्त्रीवन्नयनसलिलैर्यत्परित्याजितोऽसि
भ्रातुर्वक्षःस्थलविघटने यच्च साक्षीकृतोऽसि ।

[1] ह्स्य का कथा U.

आसीदेतत्तव कुरुपते कारणं जीवितस्य
क्रुद्धे युष्मत्कुलकमलिनीकुञ्जरे भीमसेने ॥

दुर्योधनः—दुरात्मन् भरतकुलापशद, पाण्डवपशो, नाहं भवानिव विकत्थनाप्रगल्भः । किंतु,

द्रक्ष्यन्ति न चिरात्सुप्तं बान्धवास्त्वां रणाजिरे[1] ।
मद्गदाभिन्नवक्षोऽस्थिवेणिकाभीमभूषणम् ॥"

प्ररोचना—

प्ररोचना सिद्धवद्भाव्यर्थकथनं यथा ।

"बन्दी—देव,

आस्ते द्वारि वधूर्विधातृरचनावैदग्ध्यविश्रान्तिभू[2] -
भूरेतस्य बलादहारि भवता भीतानतारातिना ।
किं नामापरमत्र कार्यमधुना साध्यं समाशास्यते
तत्पाणिग्रहमङ्गलाय मनुजाधीशास्तु यत्नो महान् ॥"

विचलनम्—

विकत्थनाद्विचलनमामनन्ति बुधा यथा ॥ ५६ ॥

"कैरवः—

ननु तव नयहीने नापराधं स्मरेयं
मनसि विसृज भीतिं मत्कुधो[3] नासि पात्रम् ।
भुवनमखिलमेको भुग्नयैव भ्रुवाहं
नियमयितुमधीशो[4] नीरजाक्षप्रभावात् ॥"

[1] रणाङ्गणे A 2; S.
[2] वैदुष्यविश्रान्तिभूः S.
[3] क्रुधां S.
[4] मपीशः S.

आदानम्—

कार्यस्य संग्रहो यत्स्यात्तदादानं मतं यथा ।

"कैरवः—(स्वगतम्) अस्तु नामैनां कुट्टिनीं देवकुलाग्रस्थापित-दीपस्तम्भोपरि निधाय गमिष्यामि ।"

अवमर्शे आवश्यकान्यङ्गानि—

व्यवसायादानशक्तित्रयमावश्यकं त्विह ॥ ५७ ॥

निर्वहणसंधिः—

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥ ५८ ॥

निर्वहणसंध्यङ्गानि—

संधिर्विरोधो ग्रथनं निर्णयः परिभाषणम्[1] ।
प्रसादानन्दसमया धृतिर्भाषोपगुम्भने ॥ ५९ ॥
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ।

संधिः—

मुखसूचितबीजार्थप्राप्तिः संधिर्मता यथा ॥ ६० ॥

"कैरवः—

आदावघटितं कार्यं मध्ये सुघटितं मम ।
भूयो विघटितं भूयो भूयाद्धटयितुं प्रभुः ॥"

विरोधः—

मार्गणं तस्य कार्यस्य विरोधः कथ्यते यथा ।

[1] परिभावनम् S.

"सौरभः—

सा त्वयैवमवमानिता सती कुट्टिनी कुपितपन्नगीनिभा ।
मारयेत्किमु महीशदर्शिता[1] मानयेत्किमुत मन्दविग्रहा ॥"

ग्रथनम्—

ग्रथनं तस्य कार्यस्य तूपक्षेपो मतो यथा ॥ ६१ ॥

"कैरवः—वयस्य, नात्र संदेहः ।

शान्तिमेति सकलोऽपि भूभुजां संनिधौ सहजवैरवर्जितः ।
तामसा अपि तरक्षवो मृगैः संचरन्ति हि समं तपोवने ॥"

निर्णयः—

अनुभूतार्थकथनं निर्णयोऽभिमतो[2] यथा ।

"सौरभः—वयस्य, मैवं मन्तव्यम् ।

स देवतावेश्मनि सत्यसंगरः सतां समक्षं समुदीरितं तथा ।
वचः स्वकीयं वसुधेश्वरः कथं मुहूर्तमात्रेण मृषा करिष्यति ॥"

परिभाषणम्—

अन्योन्यपरिवादो[3] यः परिभाषात्र सा यथा ॥ ६२ ॥

"मकरदंष्ट्रा—(सरोषम्) अले दुब्बह्मण, पहववेदिणो पुरदो पुणो वि एव्वं भणसि ।

(अरे दुर्ब्राह्मण, प्रभववेदिनः पुरतः पुनरप्येवं भणसि ।)

[1] तर्जिता S. [2] अभिहितो यथा S. [3] परिभावो S.

सौरभः—

धूर्ते दुरन्तविपदर्णवमध्यमग्नौ
दीनाववेक्ष्य कृपया दिननाथवंश्यः ।
[1]आवामपारमनयन्नयनात्तदीया-
ज्ज्ञातौ जहाति न कदापि सुतौ नरेन्द्रः ॥

अतस्ते तर्जनान्न बिभीवः ।"

प्रसादः—

प्रसीदेत्याद्यनुनयः प्रसादोऽभिमतो यथा ।

"[2]रुतसारः—(किंचिद्विहस्य) भो, क्षमस्व ममापराधम् ।"

आनन्दः—

वाञ्छितार्थस्य या प्राप्तिरानन्दः स मतो यथा ॥ ६३ ॥

"पुरोधाः—राज्ञः करेण रमण्याः करं ग्राहयति ।
राजा—(सहर्षं गृह्णाति)"

समयः—

चिरारूढस्य दुःखस्य निर्गमः समयो यथा ।

"राजा—([3]कथमपि कटाक्षेण निर्वर्ण्य अपवार्य) वयस्य,
सामिफुल्लसरसीरुहनिर्यद्भृङ्गसंततिसमाननिकायाः ।
अञ्जनाविलबाष्पलवा मे क्षालयन्ति चिरखेदममुष्याः ॥"

[1] आवामवारं S.
[2] मतसारः S.
[3] तरुणीं Added before. S.

धृतिः—

स्थिरीकरणमर्थस्य लब्धस्य तु धृतिर्यथा ॥ ६४ ॥

"पुरोधाः—ततः सप्तपदान्याक्रम्य,

कलितानि पदानि सप्त साक्षीण्यनले वामुभयोरतोऽस्तु सख्यम् ।
शिवयोरिव शाश्वतैकरस्यं चरतो यावदशीतशीतभानू ॥"

भाषणम्—

मानार्थकामादिलाभो भाषणं कथितं यथा ।

"कैरवः—

तवात्मजा तामरसायताक्षी मह्यं ससंमानमियं महीश ।
दत्ता दयावारिधिना त्वया तद्गुरूपदेशादुरु यत्सदुक्तम् ॥"

उपगुम्भनम्—

उपगुम्भनमाश्चर्यप्राप्तिरित्युच्यते यथा ॥ ६५ ॥

"पुरोधाः—(साश्चर्यम्) मनोरथसिद्ध, ममाप्येतदेव विवक्षितम् । अहो, दैवादावयोर्मतिसंवादः ।"

पूर्वभावः—

कार्यस्य दर्शनं पूर्वभावः संकीर्त्यते यथा ।

"मनोरथसिद्धः—अन्यच्चेदं ममाशास्यमस्ति । तदिदम्—तथा मालवनाथः संभावनीयो यथा प्रीयते देवी ।

सर्वः स्वजनसंमानात्संतोषमुपयाति हि ।
यथा वकुलसेकेन विकसेन्मुकुलावली ॥"

उपसंहारः—

स स्यात्कार्यस्य संहारः प्रियावाप्तिर्मतो यथा ॥ ६६ ॥

"पुरोधाः—

पुण्यैस्तस्य पुरातनैः क्षितिपतेः प्रख्यातवत्सान्वय-
क्षीराम्भोनिधिचन्द्रमाः सकलभूलोकाभिनन्द्योदयः ।
स्वैरं खर्वितपूर्वराजचरितः पूतैर्निजैर्वर्तनै-
र्जामातासि जनाधिनाथ विदिशां हंसावलीं चाप्नुयाः ॥"

प्रशस्तिः—

प्रशस्तिः प्रोच्यते सा तु यच्छुभाशंसनं यथा ।

"साहित्यभानुरयतामुदयं नृपाणां
कीर्त्यम्बुजानि विकसन्ति सितानि सन्तु ।
नाशं प्रयातु घनदुर्जनवाक्तमिस्रं
भूरस्तु संततमहोत्सवशालिनीयम् ॥"

निर्वहणे आवश्यकान्यङ्गानि—

अङ्गान्यवश्यमेतानि वाच्यानीह चतुर्दश ॥ ६७ ॥

संध्यङ्गानां प्रयोजनम्—

उक्ताङ्गानां चतुःषष्टेः षोढा चैषां प्रयोजनम् ।
इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनम् ॥ ६८ ॥
रागः प्रयोगस्याश्चार्यं वृत्तान्तस्यानुपक्षयः ।

वस्तुनस्त्रैविध्यम्—

पुनस्त्रेधा विभागः स्यात्सर्वस्याप्युक्तवस्तुनः ॥ ६९ ॥
सूच्यमेव भवेत्किंचिद् दृश्यं श्रव्यमथापरम् ।

सूच्यम्—

नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः ॥ ७० ॥

सूच्यार्थाविष्करणम्—

अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत् ॥ ७१ ॥
विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः ।

विष्कम्भः—

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ॥ ७२ ॥
संक्षिप्तार्थस्तु[1] विष्कम्भो मध्याभ्यां मध्यमेन वा ।

विष्कम्भो द्विधा—

प्रयोजितो भवेच्छुद्धः संकीर्णो नीचमध्यमैः ॥ ७३ ॥

चूलिका—

अन्तर्यवनिकासंस्थैश्चूलिकार्थस्य सूचना ।

अङ्कास्यम्—

अङ्कान्तपात्रैरङ्कास्यमुत्तराङ्कार्थसूचनम् ॥ ७४ ॥

अङ्कावतारः—

अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागतः ।
भूतभाविकथांशानां सूचको नीचभाषया ॥ ७५ ॥

प्रवेशकः—

नीचपात्रैः प्रयुक्तोऽङ्कद्वयस्यान्तः प्रवेशकः ।
एभिः संसूचयेत्सूच्यं दृश्यमङ्कैः प्रदर्शयेत् ॥ ७६ ॥

दृश्यम्—

दृश्यस्तु मधुरोदात्तरसभावनिरन्तरः ।

[1] संक्षेपार्थस्तु S.

श्रव्यम्—

नाट्यधर्ममवेक्ष्यैव श्रव्यं वस्तु त्रिधा यथा[1] ।

श्रव्यस्य त्रैविध्यम्—

सर्वश्राव्यं च नियतश्राव्यमश्राव्यमेव च ॥ ७७ ॥

प्रकाशम्; स्वगतम्—

सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम् ।
द्विविधं नियतश्राव्यं जनान्तमपवारितम् ॥ ७८ ॥

जनान्तिकम्—

त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम् ।
अन्योन्यमन्त्रणं यत्स्यात्तज्जनान्ते जनान्तिकम् ॥ ७९ ॥

अपवारितम्—

रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम् ।

आकाभाषितम्—

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।
श्रुत्वेवानुक्तमप्येतत्तत्स्यादाकाशभाषितम् ॥ ८० ॥
सर्वाङ्गसंयुतमनेकविधार्थसार्थं
सद्वृत्तनायकविशेषसमग्रशोभम् ।
राज्यं त्वदीयमिव रूपकवस्तु रम्यं
[2]मन्नक्षितीश महतां मुदमातनोति ॥ ८१ ॥

इति श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे[3]
संध्यङ्गनिरूपणं नाम सप्तमः परिच्छेदः ।

---

[1] मतम् S. [2] मन्म S. [3] सर्वालंकारसंग्रहे U.

अष्टमः परिच्छेदः

वृत्तिः—

नेतृव्यापाररूपा या वृत्तिः सा स्याच्चतुर्विधा ।

वृत्तिभेदाः—

भारती सात्त्वती चारभटी कैशिक्यतः परम् ॥ १ ॥
चतस्रो वृत्तयो ज्ञेयाः सर्वनाट्यस्य मातृकाः ।

भारती वृत्तिः—

भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः ॥ २ ॥
भरतैस्तु प्रयोज्यत्वाद्भारती चतुरङ्गिका ।

भारतीवृत्त्यङ्गानि—

प्ररोचनामुखं चैव वीथी[1] प्रहसनं तथा ॥ ३ ॥
स्थाने प्रहसनस्याथ भाणमप्याह कोहलः ।
एतेषां लक्षणं [2]पश्चात्प्रसङ्गादभिधीयते ॥ ४ ॥

सात्त्वती वृत्तिः—

[3]सात्त्वती सा मता सत्त्वशौर्यत्यागदयार्जवैः ।
युक्ता हर्षोत्तरा शोकवर्जिता समुदीरिता ॥ ५ ॥

[1] वीथ्या G 3.
[2] पश्चात्प्रसङ्गेना G 3.
[3] सात्त्वती नाम सा नेतृशौर्यत्यागदयार्जवैः G 3.

सात्त्वतीवृत्त्यङ्गानि—

संलापोत्थापकावस्याः संघश्च परिवर्तकः ।
अङ्गानि चत्वार्येतेषां क्रमाल्लक्षणमुच्यते ॥ ६ ॥

संलापकः—

संलापको [1]गभीरोक्तिर्नानाभावरसो यथा ।

"रामः—अयं सः, यः किल सपरिवारकार्तिकेयविजयावर्जितेन भगवता नीललोहितेन [2]परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः ।

परशुरामः—आम् । राम दाशरथे, स एवायं ममाचार्यपादानां प्रियः परशुः ।

अस्त्रप्रयोगखुरलीकलहे गणानां
सैन्यैर्वृतो विजित एव मया कुमारः ।
एतावतापि परिरभ्य कृतप्रसादः
प्रादादमुं प्रियगुणो भगवान्गुरुर्मे ॥"

उत्थापकः—

उत्थापकस्तु यत्रारिं युद्धायोत्थापयेद्यथा ॥ ७ ॥

"आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैतृष्ण्यं तु कुतोऽद्य संप्रति मम त्वद्दर्शने चक्षुषः ।
त्वत्सांगत्यसुखस्य नास्ति विषयः किं वा बहुव्याहृतै-
रस्मिन्विस्मृतजामदग्न्यविजये बाहौ धनुर्जृम्भताम् ।"

संघः—

नीत्या दैवेन वा भेदः संघाख्यः कथ्यते यथा ।

[1] गर्भितोक्तिः G 3. [2] परि omitted G 3.

“ चाणक्यो नीतिसामर्थ्याद्राक्षसीयानभेदयत् ।
भेदो विभीषणस्याभूद्रावणाद्दैवयोगतः ॥ ”

परिवर्तकः—

भेदं साम च दानं च निष्फलीकृत्य यत्र तु ॥ ८ ॥
परिवर्तक इत्युक्तो दण्डस्वीकरणं यथा ।

“ हेरम्बदन्तमुसलोल्लिखितैकभित्ति
वक्षो विशाखविशिखव्रणलाञ्छितं मे ।
रोमाञ्चकञ्चुकितमद्भुतवीरलाभा-
द्यत्सत्यमद्य परिरब्धुमिवेच्छति त्वाम् ॥

रामः—भगवन्, परिरम्भणमिति प्रस्तुतप्रतीपमेतत् । ”

आरभटी वृत्तिः—

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्त्यादिचेष्टितैः ॥ ९ ॥
युक्ता भवेदारभटी चत्वार्यङ्गानि तत्र च ।

आरभटीवृत्त्यङ्गानि—

संक्षिप्तिका स्यात्संफेटो वस्तूत्थानावपातने ॥ १० ॥

संक्षिप्तिः—

संक्षिप्तवस्तुरचना संक्षिप्तिः [1]शिल्पतो यथा ।
चरिते वत्सराजस्य कलिङ्गद्विपयोजना[2] ॥ ११ ॥
संक्षिप्तिरथवा नेतृदशान्तरकृतिर्यथा ।
वालिनाशेन सुग्रीवः किष्किन्धाधिपतिः कृतः ॥ १२ ॥
भार्गवस्यापि चौद्धत्यनिवृत्तौ शान्तताश्रयः ।

[1] शिल्पिनः G 3; S. [2] योजनम् G 3; S.

संफेटः—

संफेटस्तु समाघातः क्रुद्धसंरब्धयोर्यथा ॥ १३ ॥
लक्ष्मणेन्द्रजितोर्युद्धं रामरावणयोश्च वा[1] ।

वस्तूत्थापनम्—

मायाद्युत्थापितं वस्तु वस्तूत्थापनकं यथा ॥ १४ ॥
माययेन्द्रजितो[2] युद्धे दिवा [3]ध्वान्तप्रदर्शनम् ।

अवपातनम्—

[4]क्षिप्रप्रवेशनिर्याणसंभ्रमत्रासविद्रवैः ॥ १५ ॥
अवपातस्त्वसौ ज्ञेयोऽनिष्टदर्शनतो यथा ।

"नष्टं [5]वर्षवरैर्मनुष्यगणनाभावादकृत्वा[6] त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥"

कैशिकी वृत्तिः—

या रम्यनेपथ्यविशेषयुक्ता
स्त्रीभिर्युता वा बहुनृत्तगीता[7] ।
कामोपभोगप्रचुरप्रचारा
सा कैशिकी वृत्तिरुदाहृता स्यात् ॥ १६ ॥

[1] यत G 3.
[2] जिता S.
[3] चन्द्र G 3; S.
[4] क्षिप्रप्रवेशनिर्वाण G 3.
[5] वर्षधरैः S.
[6] नाशादकृत्वा G 3; S.
[7] बहुगीतनृत्यैः G 3; S.

कैशिकीवृत्त्यङ्गानि—

नर्म च नर्मस्पन्दो नर्मस्फोटश्च नर्मगर्भश्च ।
कैशिक्याश्चत्वारो भेदा ह्येते समुद्दिष्टाः ॥ १७ ॥

नर्म—

ललितमधुराभिधानं शृङ्गाररसाश्रयं सुखोपेतम् ।
इच्छाभयहास्ययुतं नर्म त्रिविधं वदन्ति यथा ॥ १८ ॥

"मध्याह्नं गमय त्यज श्रममरं स्थित्वा पयः पीयतां
मा शून्येति विमुञ्च पान्थ विजनः शीतः प्रपामण्डपः ।
तामेव स्मर घस्मरस्मरशरत्रस्तां निजां प्रेयसीं
त्वच्चित्तं तु न रञ्जयन्ति पथिक प्रायः प्रपापालिकाः ॥"

"[1]अभिव्यक्तालीको विफलसकलोपायविभव-
श्चिरं ध्यात्वा सद्यः [2]कृतकृतकसंरम्भनिपुणः ।
इतः पृष्ठे पृष्ठे किमिदमिति संत्रास्य सहसा
कृताश्लेषां धूर्तः स्मितमधुरमालिङ्गति वधूम् ॥"

"शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥"

नर्मस्पन्दः—

उत्कण्ठानिर्भरप्रेमनवसंगमसंभ्रमम् ।
अन्ते भयानकं प्राहुर्नर्मस्पन्दं तु तद्यथा ॥ १९ ॥

[1] अतिव्यक्तागस्कः G 3; S.

[2] धूत G 3.

"विसृज सुन्दरि संगमसाध्वसं ननु चिरात्प्रभृति प्रणयोन्मुखे ।
परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि ॥"

नर्मस्फोटः—

कन्यानायकयोर्यत्र वृत्तं च स्फुटितं भवेत् ।
नर्मस्फोटः स विज्ञेयः संभ्रमादियुतो यथा ॥ २० ॥

"गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं किं न्वेतत्स्यात्किमन्यदितोऽथवा ।
भ्रमति भुवने कंदर्पाज्ञा[1] विकारि च यौवनं
[2]ललितललितास्ते ते भावाः क्षिपन्ति च धीरताम् ॥"

नर्मगर्भः—

नर्मगर्भश्छन्ननेतृव्यलीकार्थाय तद्यथा ।

"दृष्ट्वैकासनसंगते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
तिर्यग्वक्रितकंधरः [3]सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥"

भारती वृत्तिः—

भारती शब्दवृत्तिः स्यादस्यास्तिस्रोऽर्थवृत्तयः ॥ २१ ॥

रसभेदेन वृत्तयः—

शृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुनः ।
रसे रौद्रे सबीभत्से वृत्तिः सर्वत्र भारती ॥ २२ ॥
आसां भेदचतुष्केऽस्मिन्नेकैकमपि वाञ्छितम् ।

[1] कंदर्पाज्ञा G 3; S. [2] प्रकृतिमधुराः G 3. [3] सपुलकं G 3; S.

प्रयोगे कविभिः कार्यं सर्वमेकत्र दुर्लभम् ॥ २३ ॥

पात्राणां भाषानियमः—

पाठ्यं तु संस्कृतं नृणामनीचानां कृतात्मनाम् ।
लिङ्गिनीनां महादेव्या मन्त्रिजावेश्ययोः क्वचित् ॥ २४ ॥
स्त्रीणां तु प्राकृतं [1]प्रायः शौरसेन्यधमेषु च[2] ।
पिशाचात्यन्तनीचादौ पैशाचं मागधं तथा ॥ २५ ॥
यद्देश्यं नीचपात्रं स्यात्तद्देश्यं तस्य भाषितम् ।

पात्राणां संबोधनक्रमः—

भगवन्तोऽवरैर्वाच्या विद्वद्देवर्षिलिङ्गिनः ॥ २६ ॥
विप्रामात्याग्रजाश्चार्या नटीसूत्रभृतौ[3] मिथः ।
रथी सूतेन चायुष्मान् पूज्यैः [4]शिष्यात्मजानुजाः ॥ २७ ॥
वत्सेति तातः पूज्योऽपि सुगृहीताभिधश्च तैः ।
भावो नटेन सूत्री च मारिषस्तेन सोऽपि च ॥ २८ ॥
देवः स्वामीति नृपतिर्भृत्यैर्भट्टेति चाधमैः ।
आमन्त्रणीयाः पतिवज्ज्येष्ठामध्याधमैः स्त्रियः ॥ २९ ॥
समा हलेति च प्रेष्या हञ्जे वेश्याज्जुकेति च ।
कुट्टिन्यत्तेत्यनुगतैः पूज्या वा जरती जनैः ॥ ३० ॥
विदूषकेण भवती राज्ञी चेति च शब्द्यते ।
[5]हण्डे नीचा पुरस्कार्या लालिता तु यवयसी ॥ ३१ ॥

[1] प्राहुः G 3; S.
[2] न्यादयोऽपि च S.
[3] कृतौ G 3; S.
[4] शिष्यात्मजा अपि G 3; S.
[5] एतदारभ्य वासूरितीर्यते (३४) इति पर्यन्तम् A 3 कोशे न दृश्यते ।

17

भगिनीपतिरावुत्तो राजा भट्टारको जनैः ।
युवराजः कुमारः स्याद्भर्तृदारक इत्यपि ॥ ३२ ॥
राजपुत्री तु तद्वत्स्यादार्यपुत्रः पतिः स्त्रिया ।
प्रियेति भर्त्रा राज्ञी स्यात्स्यालो राष्ट्रिय उच्यते ॥ ३३ ॥
देवी कृताभिषेकायामितरासु तु भट्टिनी ।
अत्तिका भगिनी ज्येष्ठा बाला वासूरितीर्यते ॥ ३४ ॥
सद्वृत्तिशालि सरसं नाट्यं नियतभाषितम् ।
त्वच्चरित्रमिवाभाति सहितं [1]मन्नभूपते ॥ ३५ ॥

इति श्रीमदमृतानन्दयोगिप्रवरविरचितेऽलंकारसंग्रहे[2]
वृत्तिनिरूपणं नामाष्टमः परिच्छेदः ।

[1] मम्म S.

[2] सर्वालंकारसंग्रहे U.

नवमः परिच्छेदः

रूपकाणि—

नाटकं [1]सप्रकरणं भाणः प्रहसनं डिमः ।
[2]व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥ १ ॥
प्रधानरूपकाण्याहुर्दशैतानि विपश्चितः ।

उपरूपकाणि—

नाटिका सट्टकं त्रोटो प्रेक्षणं गोष्ठिभाणिके ॥ २ ॥
संलापकश्च प्रस्थानं काव्यं हल्लीसरासके ।
श्रीगदितं च लासिका दुर्मल्ली नाट्यरासकम् ॥ ३ ॥
उल्लाप्यमुपरूपाणि भवन्त्येतानि षोडश ।

नाटकम्—

प्रकृतित्वादथान्येषां[3] भूयो रसपरिग्रहात् ॥ ४ ॥
संपूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते ।

रङ्गनेपथ्ये—

रङ्गः सदस्यास्थानोर्वी नेपथ्यं नटवर्गभूः ॥ ५ ॥

[1] च प्रकरणं U.

[2] वीथीसमवकाराङ्कव्यायोगेहामृगा इति U; G 3.

[3] तथान्येषां U 4.

पूर्वरङ्गः—

यन्नाट्यवस्तुनः पूर्वं [1]रङ्गे विघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः [2]स कीर्तितः ॥ ६ ॥

पूर्वरङ्गाङ्गानि—

[3]प्रत्याहारोऽवतरणमारम्भाश्रावणे अपि ।
वक्त्रपाणिः परीघट्टना या संघोटना तथा ॥ ७ ॥
मार्गासारितकं शुद्धावकृष्टोत्थापने तथा ।
परिवर्तनकं नान्दी तथा चैव प्ररोचना ॥ ८ ॥
त्रिगतं चासारितकं तथा गीतिविधिर्ध्रुवा ।
त्रिसामकमतो रङ्गद्वारं स्याद्वर्धमानकम् ॥ ९ ॥
चारिर्महाचारिरिति पूर्वरङ्गाङ्गसंहतिः ।

नान्दी—

यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके ॥ १० ॥
तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ।
आशीर्वचनसंयुक्ता यस्मान्नित्यं भवेदिह ॥ ११ ॥
देवद्विजनृपादीनां तस्मान्नान्दीति शब्दिता ।
नान्दी गुणनिका वाद्यमानद्धादित्रयोत्थितम् ॥ १२ ॥
नन्दीशः पूज्यते पुष्पैस्तेन नान्दीति सोच्यते ।
या काचित्पठ्यते सूक्तिर्यां कांचिद्देवतां प्रति[4] ॥ १३ ॥
सूत्रधारेण नाट्यादौ सा नान्दी नन्दिनो मुदे ।

[1] रङ्गविघ्नोप U; G 3. [2] प्र U.

[3] प्रत्याहारादीनां लक्षणं नाट्यशास्त्रे पञ्चमाध्याये प्रपञ्चितम् । स च भागोऽत्रानुबन्धरूपेणान्ते संयोजितः ।

[4] यया नाट्ये सरस्वती A 3.

नान्द्यां पदनियमादिः—

मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी ॥ १४ ॥
नान्दी पदैर्द्वादशभिरष्टाभिर्वाप्यलंकृता ।
द्वाविंशत्याष्टादशैर्वापि पदादिनियमो न वा ॥ १५ ॥
[1]नाट्याङ्गं संविधायेत्थं सूत्रधारे विनिर्गते ।
प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः ॥ १६ ॥
दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः ।
[2]सूचयेद्वस्तुबीजाद्यैर्मुखं पात्रक्रमाद्यथा ॥ १७ ॥

"रामो मूर्ध्नि निधाय काननमगान्मालामिवाज्ञां गुरो-
स्तद्भक्त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम् ।
तौ सुग्रीवविभीषणावनुगतौ नीतौ परां संपदं
प्रोद्वृत्ता दशकंधरप्रभृतयो ध्वस्ताः समस्ता द्विषः ॥"

"यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥"

"आसारितप्रकटनिर्मलचन्द्रहासः प्राप्तः शरत्समय एष विशुद्धकान्तः ।
उत्खाय गाढतमसं घनकालमुग्रं[3] रामो दशास्यमिव संभृतबन्धुजीवः ॥"

"तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥"

[4]अनिष्ठुरैश्च मधुरैः श्लोकैर्वाक्यार्थसूचकैः ।
ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत ॥ १८ ॥

1 पूर्वरङ्गं विधायेत्थं U; G 3.
2 सूचयेद्वस्तुबीजं वा U; G 3.
3 घनमण्डलाग्रं A 3.
4 रङ्गं प्रसाद्य मधुरैः U; G 3.

प्ररोचना—

प्ररोचना प्रशंसातस्तून्मुखीकरणं यथा ।

"श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥"

आमुखम्—

सूत्रधारो नटीं ब्रूते [1]मारिषं वा विदूषकम् ॥ १९ ॥
स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ।

आमुखाङ्गानि—

प्रस्तावनेति वा तत्र कथोद्घातः प्रवृत्तकम् ॥ २० ॥
प्रयोगातिशयश्चाथ वीथ्यङ्गानि त्रयोदश ।

कथोद्घातः—

स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः ॥ २१ ॥
गृहीत्वा प्रविशेत्पात्रं कथोद्घातो द्विधा यथा ।

"द्वीपादन्यस्मादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥"

"लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः ॥"

[1] मार्षं वाथ A. 3.

प्रवृत्तकम् —

कालसाम्यात्प्रवेशो यः प्रवृत्तकमिदं यथा ॥ २२ ॥

"प्रौढपयोधरभारा प्रावृण्मलिनाम्बरा प्रबाष्पधरा ।
मानसगराजहंसा मानवतीवाद्य मदनार्ता ॥"

प्रयोगातिशयः—

एषोऽयमित्युपक्षेपात्सूत्रधारप्रयोगतः ।
[1]पात्रप्रवेशो यत्रैव प्रयोगातिशयो यथा ॥ २३ ॥

"सौरभेण सहकारपादपः पञ्चतो हरति षट्पदावलिम् ।
रामणीयकगुणेन रागिणीं कौमुदीदृशमिवैष कैरवः ॥"

"वर्णयितुमस्य महिमा वसन्तसमयस्य शक्यते केन ।
यदयं विप्रो वृद्धोऽप्युज्झति दामोदरो निजां प्रकृतिम् ॥"

वीथ्यङ्गानि—

वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेऽत्रैव तानि तु ।
उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम् ॥ २४ ॥
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृदवानि त्रयोदश ॥ २५ ॥
[2]वीथीप्रसङ्गे वीथ्यङ्गलक्षणं [3]तत्र वक्ष्यते ।
एषामन्यतमेनार्थं पात्रं वाक्षिप्य सूत्रभृत् ॥ २६ ॥
प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत् ।

[1] पात्रप्रयोगो यत्रैव U ; G 3.
[2] आदौ प्रसङ्गात् A 3 ; U.
[3] तस्य A 3.

सर्वनाट्यसाधारणाङ्गानि—

पूर्वरङ्गः सभापूजा कवेर्गोत्रादिकीर्तनम्[1] ॥ २७ ॥
नाटकादेस्तथा संज्ञा सूत्रधारोऽप्यथामुखम् ।
अर्थोपक्षेपकाः पञ्च चतस्रो वृत्तयोऽपि च ॥ २८ ॥
नाट्योक्तिश्च [2]समावेशस्तथा भाषाविभाषयोः ।
प्रायशः सर्वनाट्येषु कीर्त्यन्ते संगता इमे ॥ २९ ॥

नाटकादीनां संज्ञाकरणे नियमः—

संज्ञा तु नाटकादीनां नायकेनेतरेण वा ।
नायिकानायकाख्यानात्संज्ञा प्रकरणादिषु ॥ ३० ॥
नाटिकासट्टकादीनां नायिकाभिर्विशेषणम् ।

आधिकारिकेतिवृत्तम्—

अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान् ॥ ३१ ॥
कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः ।
प्रख्यातवंशो राजन्यो दिव्यो वा यत्र नायकः ॥ ३२ ॥
तत्प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम् ।
यत्तत्रानुगतं किंचिन्नायकस्य रसस्य वा ॥ ३३ ॥
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ।
यथा वालिवधस्त्यक्तश्छद्मनोदात्तराघवे ॥ ३४ ॥
कल्पितो वीरचरिते वधस्तस्यैव चान्यथा ।

नाटके संधिनियमः—

आद्यन्तमेवं निश्चित्य पञ्चधा तद्विभज्य च ॥ ३५ ॥

[1] वर्णनम् S.

[2] समादेशः A 3.

खण्डशः संधिसंज्ञांस्तान् भागानपि च खण्डयेत् ।
द्वित्रिद्वित्रिचतुर्युक्तदशसंख्यान्यनुक्रमात् ॥ ३६ ॥
चतुःषष्टिश्च तानि स्युरङ्गानि त्विह संधिषु ।

नाटके विष्कम्भः—

आदौ विष्कम्भकं कुर्यादङ्कं वा कार्ययुक्तितः ॥ ३७ ॥
अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम् ।
